


ॐ

॥ काव्यप्रकाशाचमनम् ॥

(प्रथमाचमनम्)




श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

॥ काव्यप्रकाशाचमनम् ॥

(प्रथमाचमनम्)

प्रेरणामूर्तय:

श्रीकुलपतिवर्या:

प्रॉ. पङ्कज एल. जानीजीमहाभागा:

मार्गदर्शका:

प्रधानाचार्या:

डॉ. नरेन्द्र एल. पण्ड्यामहाभागा:

लेखकौ

ललित: पटेल: - पङ्कज: रावल: च

(अध्यापकौ)

श्री सोमनाथसंस्कृतयुनिवर्सिटी- सञ्चालित-संस्कृत कॉलेज, वेरावलम्

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाष: - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info



त्र्यंबकम् यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात् ॥

प्रकाशकः -
निर्देशकः
श्रीसोमनाथ संस्कृतयुनिवर्सिटी - वेरावलम्
कार्यालयः - राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६५.
जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - २००८
प्रतयः -५००

द्वितीयं संस्करणम् - २०१३
ISBN -13 978-81-925721-3-0

प्रतयः -३००

मूल्यम् - रु. १००/-

मुद्रक :
एच. के. ओफसेट

अनुक्रमणिका



शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥

======

॥ शुभाशंसनम् ॥

"देवस्य पश्य काव्यं न ममार न जीर्यति"

केवलं परमात्मनः काव्यं वैदिकसाहित्यम् एव न हि प्रत्युत तत्संङ्केतेन लौकिक-संस्कृतकाव्येन सह तत्सिद्धान्तप्रतिपादकं काव्यशास्त्रमपि निरन्तरं जीवति यदि यत्नः सदैव क्रियेत। तद्रक्षणाय अभ्यास अपेक्षितः वर्तते। अन्यत् च कथनीयम् अस्ति यत् प्राप्तं ज्ञानं तु कस्यचित् जनस्य तस्यैव स्वान्तःसुखाय भवति परन्तु प्रकाशितं ज्ञानं लोकसुखाय अपि भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः पाठ्यपुस्तकानां लेखनाय सदैव अत्रस्थान् विदुषः प्रेरयति; येनास्माकं छात्राणाम् अध्ययने सौविध्यम् जायेत। अस्यैव फलमस्ति यत् अद्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रथमे दीक्षान्तस्य अवसरे कतिपयानां पाठ्यपुस्तकानाम् अन्येषामपि सन्दर्भग्रन्थानां प्रकाशनं भवति। एतत् प्रकाशनं विलोक्य हर्षो मे जायते। अस्याम् एव शृंखलायां एतदपि "काव्यप्रकाशाचमनम्" काव्यशास्त्रीयं पुस्तकम् आचार्यकक्षायाः (साहित्यस्य) छात्राणां कृते डॉ. नरेन्द्रभाई एल. पण्ड्या-महोदयस्य निर्देशने ***श्रीललितभाई पटेल****-महोदयेन तथा च* ***श्रीपङ्कजभाई रावल*** *महोदयेन यद् द्वितीयं संस्करणं संपादितं वर्तते - तस्य प्रकाशनं विलोक्य प्रसन्नता मयि जायते, अत्र प्रथमो ल्लासप्रभृतिषष्ठोल्लासगताः काव्यप्रकाशस्य विषयाः छात्राणाम् उपयोगाय सरल-शैल्यां निरूपिताः वर्तन्ते। अस्य सफलतायै कामनां कुर्वन् अहं अस्य ग्रन्थस्य निर्देशकमहोदयानां कृते तथा च सम्पादकानां कृते वर्धापनं, शुभाशंसनं च ददामि।*

"वेदः स्वस्ति"

-प्रॉ. पङ्कज एल. जानीमहाभागाः
कुलपतिश्री
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

अस्माभिः कक्षायां काव्यप्रकाशः पाठयते स्म तदा चिन्तितं यत् केन प्रकारेण छात्रा: ग्रन्थं सम्यग् अवगच्छेयु: ? केन प्रकारेण अस्माभिः पाठनीयम् ? केन प्रकारेण च अस्माकं पाठनं रसमयं भवेत् ? इति।

तेषां प्रश्नानां समाधानाय अत्र प्राय: सर्वेऽपि विषया: सरलया सरसतया च चर्चिता:। विदुषां कृते एष: यत्न: न, अपि तु इदं काव्यप्रकाशाचमनं विद्यार्थिनां कृते उपकारकं भविष्यति इति आशास्महे। क्व काव्यप्रकाशग्रन्थ: क्व चाल्पविषया मति:। काव्यप्रकाशाचमनं कर्तुं कुत्रापि एतस्य दुर्गमग्रन्थस्य विचारान् प्रकटीकर्तुं व्युत्पत्तिन्यूनतया यदि दोषा: अभविष्यन् तर्हि तान् दूरीकृत्य क्षन्तव्यावयम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **कुलपतिश्री प्रो. वेम्पटि कुटुम्बशास्त्रि**महाभागेभ्यो धन्यवादान् वितरामः, येषां प्रेरणयाऽध्यापनादि-विविध-कार्यव्यग्रत्वेऽपि ग्रन्थमिमं सम्पादयितुं प्रभवाम्। **डॉ. नरेन्द्र एल. पण्ड्या** महाभागेभ्य अपि धन्यवादान् प्रयच्छामः, येषां मार्गदर्शनेन गूढा: विषया: अपि स्फुटीभूता:। संस्कृतस्य गुरुपदे स्थित्वाऽपि वर्तते सङ्गणकक्षेत्रे येषां महतीगति: तान् **श्रीकालिदासठाकर**वर्यायधन्यावादान् समर्पयामः यैः झटिति समयानुगुणं वर्गन्यासः सम्पादितः। सरस्वत्या: कृपा सदा विलसेत् इत्यभिलाषः।

– लेखकौ

ललितपङ्कजौ

॥ पुरोवाच: ॥

काव्यप्रकाशग्रन्थस्य सुखबोधाय सद्धियाम् ॥
कृतं काव्यप्रकाशस्याचमनं संस्कृतान्वितम् ॥ १ ॥

अस्मिन्नधीयमाने तु जिज्ञासुच्छात्रसद्गण: ॥
प्रकाशे लभते नूनं प्रवेशं सुखरूपत: ॥२ ॥

सरलं संस्कृतं चाऽत्र सुखबोध: प्रयोजनम् ॥
विषयस्य प्रवेशाय कृतमाचमनं बुधै: ॥३ ॥

वयमाशास्महेऽमुष्य ग्रन्थस्य सम्प्रसारताम् ॥
छात्राणां ग्रन्थरुच्यै स्यात् ग्रन्थबोधाय सर्वथा ॥४॥

डॉ. नरेन्द्र एल. पण्ड्या
प्रधानाचार्या:
श्रीसोमनाथसंस्कृतयुनिवर्सिटीसंचालितसंस्कृतकॉलेज
वेरावलम्

***

विवेचनं सर्वप्रथमं भरतमुनेः नाट्यशास्त्रे एव उपलभ्यते । **"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"** इति रससूत्रं रससिद्धान्तस्य प्राणभूतं वर्तते । परवर्तिनः आचार्याः तस्योपरि एव रसविवेचनं कृतवन्तः । अतः भरतमुनिः रससम्प्रदायस्य आदिप्रवर्तकः । नाट्यशास्त्रस्य षष्ठे अध्याये रसानाम् एवं सप्तमे भावानां विस्तारपूर्वकं भरतमुनिना विवेचनं कृतम् । भट्टनायकः शङ्कुकः भट्टलोल्लटः अभिनवगुप्तपादादयः आचार्याः रससिद्धान्तस्य प्रमुखव्याख्याकाराः प्रसिद्धाः । काव्यप्रकाशे तेषां मतानां विषये विस्तृतचर्चा वर्तते । ध्वनिवादिनः आचार्या अपि 'रसध्वनिः' काव्यस्य आत्मा इति वदन्ति । **न हि रसादृते कश्चिदर्थः प्रवर्तते ।**

२. अलङ्कारसम्प्रदायः

कालक्रमात् भरतानन्तरं जातः आचार्यः भामहः अलङ्कार-सम्प्रदायस्य प्रवर्तकः । उद्भट-दण्डि-रुद्रट-प्रतिहारेन्दुराज-जयदेवादयः अलङ्कारवादिनः आचार्याः । तेषां मतानुसारं रसोऽस्ति किन्तु काव्ये प्रमाणभूतं जीवनविधायकं तत्त्वम् अलङ्कारः । अलङ्कारविहीनकाव्यम् इत्युक्ते उष्णताविहीनवह्निः । अतः 'चन्द्रालोक' इति ग्रन्थे जयदेवः कटाक्षपूर्वकं वदति यत् -**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती । असौ न मन्यते कस्मादनुष्णमनलङ्कृती** ॥ तेषाम् अनुसारं काव्यस्यात्मा अलङ्कारः । रस-भावादीनाम् अन्तर्भावं ते रसवदलङ्कारे कुर्वन्ति । रसवत्-प्रेय-ऊर्जस्वि-समाहिताः एते चत्वारः रसवदलङ्काराः । '**रसवद्दर्शितस्पष्टशृङ्गारादरसं यथा**' -भामहः

३. रीतिसम्प्रदायः

रीतिसम्प्रदायस्य प्रवर्तकः वामनः । वामनद्वारा लिखितः ग्रन्थः 'काव्यालङ्कारसूत्रवृत्तिः' इति । अलङ्कारस्य अपेक्षया रीतिः काव्ये प्रधानमस्ति इति तस्य मतम् । 'रीतिरात्मा काव्यस्य' इति तस्य प्रमुखः सिद्धान्तः । वामनः रीतेः विवेचनां करोति यत् - '**विशिष्टपदरचना रीतिः**' तत्र विशेष इत्युक्ते - 'विशेषो गुणात्मा' अर्थात् - काव्यरचनायां माधुर्यादिगुणानां सन्निवेशः विशेषता । सा विशेषता एव रीतिः इति कथ्यते । एवं गुणरीत्योः घनिष्ठः सम्बन्धः वर्तते । अतः एषः सम्प्रदायः



प्रस्तावना



कृतं श्रीमम्मटाचार्यवर्यैः वाग्देवतावरैः ।
काव्यप्रकाशपीयूषं वहतु मे सदा हृदि ॥

आचार्यभरतात् प्रारब्धा साहित्यशास्त्रधारा कविराजजगन्नाथपर्यन्त-अजस्त्रं प्रवाहिता आसीत्। तत्र गङ्गारूपा काश्मीरी-परम्परा तथा च यमुनारूपा मालवपरम्परा। तत्रापि काव्य-प्रकाश: पवित्रनिर्झरवत् लब्धप्रतिष्ठ: ग्रन्थ:। वाग्देवतावतारेण-ध्वनेः पुन: प्रतिष्ठापकराजानकमम्मटाचार्येण रचित: काव्यप्रकाश: दुर्गम: तथापि साहित्यशास्त्रज्ञानाय एकं प्रस्थानम्। काव्यप्रकाशस्य टीकाकारेण महेश्वरभट्टाचार्येण उक्तम् -

काव्यप्रकाशस्य कृता गृहे गृहे
टीकास्तथाप्येष तथैव दुर्गमः।

व्याकरणशास्त्रे यत् स्थानं पतञ्जलिना रचित-महाभाष्यस्य, वेदान्ते यद् स्थानं शङ्कराचार्येण रचितशारीरकभाष्यस्य च तत् स्थानं साहित्यशास्त्रे मम्मटकृतकाव्यप्रकाशस्य प्रतिष्ठितम्। वाग्देवतावता-रश्रीमम्मटभट्टप्रणीत: काव्यप्रकाशोऽयम् अलङ्कारशास्त्रग्रन्थेष्वेकतमो निबन्ध:। साहित्यशास्त्रस्य सर्वेऽपि विषया: प्राय अत्र प्रतिपादिता:। एतस्य ग्रथस्य उपरि बह्व्यः टीका: संवृत्ता। प्राय: भारते सर्वेषु विश्वविद्यालयेषु अयं ग्रन्थ: आचार्यशास्त्रिपरीक्षासु पाठ्यते। अत: बालानां सुखबोधाय पठनयोग्यम् एकं सन्दर्भसाहित्यं सरल-संस्कृतमाध्यमेन अस्माभि: प्रकाशनीयम् इति निर्णय: कृत:। यदा

कृता। अतः मम्मटाचार्य 'ध्वनिप्रतिष्ठापोषकः परमाचार्यः' इति प्रसिद्धः। अनन्दवर्धनः ध्वनेः व्याख्यानं करोति यत् – **यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**

६. औचित्यसम्प्रदायः

औचित्यसम्प्रदायस्य संस्थापकः आचार्यः क्षेमेन्द्रः। 'औचित्यविचारचर्चा' इति तस्य ग्रन्थः। सः औचित्यं महत्त्वपूर्णे गौरवपदे स्थापितवान्। आनन्दवर्धनाचार्योऽपि औचित्यस्य महत्त्वं प्रतिपादयति "**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥**" क्षेमेन्द्रानुसारम् औचित्यमित्युक्ते 'उचितभावः'। **उचितं प्राहुराचार्याः सदृशं किल यस्य यत् । उचितस्य च यो भावः तदौचित्यं प्रचक्षते** ॥ भरतात् जगन्नाथपर्यन्तं द्विसहस्रं वर्षाणि यावत् एतेषां सम्प्रदायानां विकासः मतान्तरसिद्धान्तसहितम् अभवत्। प्रायः पञ्चचत्वारिंशद् विद्वांसः आचार्याः साहित्यशास्त्रस्य विकासे योगदानं दत्तवन्तः। साहित्यशास्त्रे प्रवेशाय एतेषां सम्प्रदायानां परिचयस्य उपकारकत्वात् आवश्यकता स्यादेव।

०००

॥ साहित्यशास्त्रे सम्प्रदायाः ॥

साहित्यशास्त्रस्य अध्ययनात् अनुशीलनात् वा ज्ञायते यत् एतस्मिन् शास्त्रे विविधाः सम्प्रदायाः विद्यमानाः सन्ति । काव्यात्मभूततत्त्वं किम् ? एतस्मिन् विषये मतभेदात् सम्प्रदायानां चर्चा उद्भूता । आत्मभूततत्त्वे सति काव्यत्वं विद्यते तत् तत्त्वं किम् ? एतस्य प्रश्नस्य निराकरणाय अनेके सम्प्रदायाः समुद्भूताः । भरतात् आरभ्य पण्डितराज–जगन्नाथपर्यन्तं ये आचार्याः अभवन् ते कस्मिन् अपि सम्प्रदाये अन्तर्भूताः भवन्ति । 'रसः एव काव्यस्य आत्मा' एवं वदन्तः आचार्याः रससम्प्रदाये अन्तर्भूताः । 'काव्ये तु अलङ्कारस्य प्राधान्यम्' इति जानन्तः आचार्याः अलङ्कारवादिनः 'रीतिरात्मा काव्यस्य' इति उद्घोषयन्तः रीतिसम्प्रदाय–वादिनः । 'वक्रोक्तिः काव्यजीवितम्' अतः वक्रोक्तिः एव काव्यस्य आत्मा इत्येकं मतम् । 'ध्वनिः एव काव्यस्य आत्मा' एवं वदन्तः ध्वनिवादिनः कथ्यन्ते । औचित्यमेव काव्यसर्वस्वं मन्वानाश्च औचित्यवादिनः सन्ति। एवं साहित्यशास्त्रे मुख्यत्वेन षट् सम्प्रदायाः (विचारपरम्पराः) प्रायः भवन्ति ।

क्रमः	**सम्प्रदायः**	**प्रवर्तकः आचार्यः**	**ग्रन्थः**
१.	रससम्प्रदायः	भरतमुनिः	नाट्यशास्त्रम्
२.	अलङ्कारसम्प्रदायः	भामहः	काव्यालङ्कारः
३.	रीतिसम्प्रदायः	वामनः	काव्यालङ्कारसूत्रम्
४.	वक्रोक्तिसम्प्रदायः	कुन्तकः	वक्रोक्तिजीवितम्
५.	ध्वनिसम्प्रदायः	आनन्दवर्धनः	ध्वन्यालोकः
६.	औचित्यसम्प्रदायः	क्षेमेन्द्रः	औचित्यविचारचर्चा

१. रससम्प्रदायः

सर्वेषु सम्प्रदायेषु मुख्यः प्राचीनः सम्प्रदायः एषः । भरतमुनिः रससम्प्रदायप्रवर्तकः । यद्यपि 'काव्यमीमांसा' इति ग्रन्थे राजशेखरः नन्दिकेश्वरं भरतात् पूर्वं रससिद्धान्तप्रतिष्ठापकं मन्यते किन्तु तस्य ग्रन्थः न उपलभ्यते । अतः रसविषयकं

उव्वटः तस्य कनीयांसौ भ्रातरौ आस्ताम्। भीमसेनदीक्षितानुसारं सरस्वती स्वयं काश्मीरदेशे पुमान् अभूत्। अतः मम्मटः 'वाग्देवतावतारः'। किन्तु वाजसनेयीसंहितायाम् उव्वटानुसारं तस्य पितुः नाम वज्रटः, न तु जैयटः, सः आनन्दपुरे वसति स्म।

(आ) जनश्रुतिः –

द्वितीया एका अनुश्रुतिः वर्तते यत् आचार्यमम्मटः नैषधीयचरितकर्तुः श्रीहर्षस्य मातुल आसीत्। श्रीहर्षेण स्वस्य महाकाव्यं मम्मटं दर्शितम्। मातुलेन मम्मटेन उक्तं यत् – 'भागिनेय! यदि त्वया इदं काव्यं पूर्वम् अदर्शिष्यत तर्हि मया काव्यप्रकाशे दोषदर्शनविषये उदाहरणानि समाहर्तुं यत् वृथा यत्नः कृतः तत् न अभविष्यत्' इति। यद्यपि एतस्याम् ऐतिहासिकता न प्रतिभाति। पुनः मम्मटश्रीहर्षौ न तु समानकालिकौ।

२. जन्मस्थानम् –

आचार्यमम्मटस्य जन्म काश्मीरप्रदेशे अभवत्। काश्यां स विद्याध्ययनं कृतवान् पुनः तत्रैव काव्यप्रकाशं रचितवान्। मम्मटः काश्मीरनिवासी आसीत् तस्य कृते अधो लिखितानि प्रमाणानि सन्ति –

- निदर्शनटीकायामपि 'मम्मटः काश्मीरदेशे अभवत्' इति उल्लेखः वर्तते।
- अल्लट-रुद्रट-भल्लट-लोल्लटवत् मम्मटस्यापि नाम अनुकरणेन टकारान्तत्वात् काश्मीरदेशीयम् इति निश्चेतुं शक्यते।
- काश्मीरप्रणालिकानुसारं 'राजानक' इत्युपाधिना मम्मटः सम्मानितः आसीत्।
- काव्यप्रकाशस्य पञ्चमे उल्लासे 'चिडकु'शब्दस्य प्रयोगः मम्मटेन कृतः। काश्मीरभाषायां 'चिडकु' अश्लीलार्थबोधकः।

काश्मीरप्रदेशस्य आनन्दपुरम् मम्मटस्य जन्मस्थानमस्ति। तथापि केचन गुजराते विद्यमानं वडनगरं मम्मटस्य जन्मस्थानं मन्यन्त। तत् अप्रामाणिकम् इति प्रतिभाति। केचन सुधासागरकारेण दत्तं मम्मटवृत्तम् अप्रामाणिकतया पश्यन्तः सन्ति। यथा आफ्रेट – 'मूर्खपरम्परा' (A silly tradition) इति वदति। पुनः मम्मटानन्तरं षट्शततमे वर्षे भीमसेनदीक्षितः अभवत्। अतः एतत् सर्वं चिन्तनीयं भवति।

'गुणसम्प्रदायः' इति नाम्ना अपि प्रसिद्धः। वामनः गुणालङ्कारयोः भेदं दर्शयति यत् – '**काव्यशोभायाः कर्तारो धर्माः गुणाः ।**' '**तदतिशयहेतवस्त्वलङ्काराः ।**' अर्थात् गुणाः काव्यशोभायाः उत्पादकाः । अलङ्काराः तु केवलं काव्यशोभायाः अभिवर्धकाः भवन्ति। एवं वामनेन अलङ्कारस्य प्रधानतां समाप्य रीतेः प्रधानतायाः प्रतिपादनं कुर्वता रीतिसम्प्रदायस्य स्थापना कृता । मम्मटादयः आचार्याः रीतेः उपयोगितायाः स्वीकारं कुर्वन्ति किन्तु काव्यस्यात्मरूपेण स्वीकारं न कुर्वन्ति। तेषां मतानुगुणम् '**रीतयोऽवयवसंस्थानविशेषवत् ।' इति ।**

४. वक्रोक्तिसम्प्रदायः

वक्रोक्तिसम्प्रदायस्य संस्थापकः वक्रोक्तिजीवितकारः कुन्तकः अस्ति। सः रीतेः प्रधानतां समाप्य वक्रोक्तेः प्रधानतां स्थापयति। भामहः अपि वक्रोक्तिं स्वीकरोति। **सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते**' वामनोऽपि – 'सादृश्याल्लक्षणा वक्रोक्तिः' उक्त्या वक्रोक्तिम् अङ्गीकरोति। किन्तु भामहादीनां मतानुसारं वक्रोक्तिः अलङ्काररूपा एव भवति । कुन्तकः वक्रोक्त्यै गौरवं दत्तवान् अतः सः वक्रोक्तिसम्प्रदायस्य प्रतिष्ठापकः । सः 'वक्रोक्तिजीवितम्' इति विशालं महत्त्वपूर्णं च ग्रन्थं रचितवान् । वामनेन देशभेदस्य उपरि पाञ्चाली-वैदर्भी-गौडीत्यादयः रीतयः कृताः । ताः रीतयः कुन्तकेन रचनाशैली-द्वारा क्रमशः मध्यममार्गः सुकुमारमार्गः विचित्रमार्गः इति नाम्ना उक्ताः।

५. ध्वनिसम्प्रदायः

आनन्दवर्धनाचार्यः ध्वनिसम्प्रदायस्य प्रवर्तकः । तेन लिखितः ग्रन्थः 'ध्वन्यालोकः' वर्तते। तत्र 'काव्यस्यात्मा ध्वनिः' इति तस्य सिद्धान्तः। एतेषु सर्वेषु सम्प्रदायेषु एषः प्रबलः महत्त्वपूर्णः च सम्प्रदायः। एतस्य विरोधरूपेण व्यक्तिविवेकादयः बहवः ग्रन्थाः विद्वद्भिः लिखिताः । किन्तु यथा अग्निना सुवर्णं शुद्धं भवति तथा विरोधात् ध्वनिसिद्धान्तः अधिकाधिकं प्रतिष्ठितः अभवत् । ध्वनिसिद्धान्तविरोधार्थं वैयाकरणाः मीमांसकाः नैयायिकाश्च कोलाहलं कृतवन्तः । किन्तु अन्ते मम्मटाचार्येण प्रबलयुक्तिद्वारा सर्वेषां खण्डनं कृत्वा ध्वनेः स्थापना

Grammar, the KAVYAPRAKASHA becomes a starting point for future exegesis and expansion - History of Sanskrit Poetics काव्यप्रकाशः साहित्यशास्त्रस्य आकरग्रन्थः। अतः सुधासागर-कारेण भीमसेनदीक्षितेन मम्मटः 'वाग्देवतावतारः' इति उक्तम्।

काव्यप्रकाशस्य सङ्कलनम् -

दशसु उल्लासेषु काव्यप्रकाशे काव्यशास्त्रस्य निरूपणमभवत्। 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'। काव्यलक्षणं काव्यप्रकाशस्य अनुक्रमसूचिः। प्रथमे उल्लासे काव्यप्रयोजन-काव्यहेतु-काव्यलक्षण-काव्यभेदादीनां निरूपणम्। द्वितीयोल्लासे वाचक-लक्षक-व्यञ्जकशब्दनिरूपणं तथा च वाच्य-लक्ष्य-व्यङ्ग्यार्थविवेचनम्। तृतीये आर्थीव्यञ्जनायाः प्रकाराणां स्पष्टीकरणम्। चतुर्थे उल्लासे ध्वनिप्रकाराणां तथा रसमीमांसायाः विवेचनम्। गुणीभूतव्यङ्ग्यस्य अष्टप्रकाराणां तथा च व्यञ्जनावृत्तिस्थापना पञ्चमे उल्लासे विद्यते। षष्ठे उल्लासे चित्रकाव्यस्य निरूपणम्। काव्यदोषाणां सोदाहरणं स्पष्टीकरणं सप्तमोल्लासे। नवमे शब्दालङ्काराणां गुणवृत्तीनां विवरणम्। दशमे ६१ अर्थालङ्काराणां सोदाहरणं सम्यक् विवेचनम्। काव्यप्रकाशस्य त्रयः अंशाः (१) कारिका (२) वृत्तिः (३) उदाहरणानि। काव्यप्रकाशे १४२ कारिकाः सन्ति। तासां कारिकाणां २१२ सूत्रेषु विभाजनं कृतमस्ति। कारिकायाः उपरि गद्यवृत्तिः नानाविध-ग्रन्थेभ्यः ६०० उदाहरणानि मम्मटेन उद्धृतानि।

(२) शब्दव्यापारविचारः -

शब्दव्यापारविचारनामा शब्दवृत्तिविवेचनयुक्तः लघुवपुः अपरः ग्रन्थोऽपि मम्मटेन रचितः। निर्णयसागरमुद्रणालयद्वारा तस्य प्रकाशनमभवत्। एतस्मिन् ग्रन्थे अभिधालक्षणयोः विस्तारपूर्वकं वर्णनं मम्मटाचार्येण कृतमस्ति।

ooo

॥ आचार्यमम्मटस्य जीवनं समयः कृतयः च ॥

ऐतिहासिकविषये संस्कृतसाहित्यस्य स्थितिः समाधानकारिका नास्ति। बहूनां साहित्यकाराणां जीवनविषये स्वल्प एव परिचय उपलभ्यते तथैव मम्मटस्य विषयेऽपि विशेषवृत्तं न प्राप्यते । एकादशख्रैष्टशताब्दे भारतीय साहित्याकाशे आचार्यमम्मटरूपस्य जाज्वल्यमानस्य नक्षत्रस्योदयः अभवत् । दुर्दैवात् मम्मटजीवनवृत्तान्तविषयकं प्रामाणिकवृत्तं न उपलभ्यते तथापि काव्यप्रकाशस्य केचन टीकाकाराः जनश्रुतिद्वारा आचार्यमम्मटस्य जीवनविषये उल्लेखं कुर्वन्ति।

१. मम्मटाचार्यस्य जीवनम् —

(अ) सुधासागरकार-भीमसेनदीक्षितानुसारम् ।

'सुधासागरः' (शुद्धोदधिः) इति भीमसेनदीक्षितेन लिखितः काव्यप्रकाशस्य टीकाग्रन्थः । तत्र भीमसेनेन मम्मटस्य परिचायकरूपेण कानिचित् पद्यानि लिखितानि। यथा –

शब्दब्रह्म सनातनं न विदितं शास्त्रैः क्वचित् केनचित्
तद्देवी हि सरस्वती स्वयमभूत् काश्मीरदेशे पुमान् ।
श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः
श्रीमन्मम्मटसंज्ञया श्रिततनुं सारस्वतीं सूचयन् ॥
मर्यादां किल पालयन् शिवपुरीं गत्वा प्रपठ्यादरात्
शास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात् ।
कस्तस्य स्तुतिमाचरेत् कविरहो को वा गुणान् वेदितुं
शक्तः स्यात् किल मम्मटस्य भुवने वाग्देवतारूपिणः ॥
श्रीमान् कैयटऔवटौ ह्यवरजौ यच्छात्रतामागतौ
भाष्याब्धिं निगमं यथाक्रममनुव्याख्याय सिद्धिं गतौ ।

अत्र प्रतीयते यत् मम्मटः काश्मीरनिवासिनः जैयटस्य पुत्र आसीत्। सः वाराणसीं गत्वा विद्याभ्यासं कृतवान् । महाभाष्यटीकाकारः कैयटः तथा च यजुर्वेदभाष्यकारः

१. नियतिकृतनियमरहिता

कवेः सृष्टिः 'नियतिकृतनियमरहिता' किन्तु ब्रह्मणः सृष्टिः नियतिकृतनियमसहिता भवति। 'नियति' इत्यस्य अर्थद्वयम् 'नियम्यन्ते सौरभादयो धर्मा अनया इति नियतिसाधारणो धर्मः पद्मत्वादिकः' अर्थात् – येन सौरभादिधर्माणां नियन्त्रणं भवति सः पद्मत्वादिरूपः असाधारणः धर्मः 'नियति'पदेन कथ्यते। 'यत्र पद्मत्वं तत्र सौरभविशेषः' इति व्याप्तिः एव नियतिकृतनियमः। ब्रह्मणः सृष्टिः अनेन नियतिकृतनियमेन युक्ता भवति। किन्तु कवेः सृष्ट्यां एषः नियतिकृतनियमः न भवति। कवेः सृष्ट्यां तु नायिकायाः मुखे कमलसौरभः नेत्रे कमलसौन्दर्यं शरीरे च कमलकोमलता वर्तते। 'नियति'शब्दस्य द्वितीयः अर्थः अदृष्टं धर्माधर्मौ वा। ब्रह्मणः सृष्टिः अदृष्टसिद्धान्तव्याप्ता। अदृष्टस्य फलभोगार्थं हि ब्रह्मणः सृष्ट्याः रचना। तदनुसारं प्रत्येकः जनः सुखं दुःखं स्वर्गं नरकं च लभते। कवेः सृष्ट्याम् एषः नियमः नास्ति। कवेः कल्पनानुसारं नायकः दुःखं सौख्यं धनं लभते न लभते वा। कवेः सामर्थ्यं ब्रह्मणः सामर्थ्यात् अधिकम्, अतः कवेः सृष्टिः 'नियतिकृतनियमरहिता'

२. ह्लादैकमयी

कवेः सृष्ट्याः द्वितीया विशेषता 'ह्लादैकमयत्वं' वर्तते। ब्रह्मणः सृष्ट्यां सुखदुःखादीनाम् अस्तित्वं वर्तते। संसारस्य सर्वे प्राणिनः सुखदुःखादीनाम् अनुभवं कुर्वन्ति। सुखैः सह दुःखस्य भोगः अपि अवश्यम्भावी अस्ति। परन्तु कवेः सृष्ट्यां दुःखस्यास्तित्वं नास्ति। कवेः सृष्ट्यां तु इन्दुमतीवियोगे अजविलापं शृण्मः अथवा उत्तररामचरिते सीतावियोगे रुदन्तं रामचन्द्रं पश्यामः तथापि आनन्दानुभवः भवति। आनन्दातिरेकेण द्रवीभूतनेत्राभ्याम् अश्रुधारा प्रवाहिता भवति। कवेः सृष्ट्यां रोदन-क्रन्दनयुक्तः करुणरसोऽपि आनन्दानुभूतिरूपः वर्तते। अतः साहित्यदर्पणकारेण उक्तं यत् – **करुणादावपि रसे जायते यत् परं सुखम्। सचेतसामनुभवः प्रमाणं तत्र केवलम्॥** अतः कवेः सृष्टिः केवला सुखमयी ह्लादैकमयी एव।

३. आचार्यमम्मटस्य समयः -

आचार्यमम्मटस्य आविर्भावः तस्मिन् समये अभवत् यस्मिन् समये काश्मीरदेशे नूतनसाहित्यचेतनायाः स्फुरणं भवति स्म । अन्तर्बाह्यप्रमाणैः मम्मटस्य समयः १०५०तमखैष्टाब्दात् ११००तमखैष्टाब्दपर्यन्तं निर्धारयितुं शक्यते । यतः -

(१) मम्मटः अभिनवगुप्तस्य तथा च नवसाहसाङ्कचरितस्य उल्लेखं करोति । तयोः समयः क्रमशः १०१५ तः १००५ खैष्टाब्दाः इति निश्चितम् । (२) उदात्तालङ्कारोदाहरणे भोजराजस्यापि उल्लेखः मम्मटेन कृतः यत्- 'यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम्' इति । भोजराजस्य शासनकालः १०५४तम-खैष्टाब्दाद् अनन्तरं नास्ति । उपर्युक्तप्रमाणद्वयेन काव्यप्रकाशस्य निर्माणकालः १०५०तम-खैष्टाब्दात् प्राक् न स्यात् इति निश्चितं भवति । इत्थं काव्यप्रकाशस्य पूर्वसीमास्ति । तथैव काव्यप्रकाशस्य उत्तरसीमापि ११४३ खैष्टाब्दात् अग्रे वक्तुं न शक्नुमः । यतः -

(१) हेमचन्द्राचार्येण काव्यानुशासनं प्रायः ११४३तमे खैष्टाब्दे रचितम् । तस्मिन् मम्मटस्य उल्लेखः अस्ति । (२) माणिक्यचन्द्रेण ११५९-६०तमे खैष्टाब्दे काव्यप्रकाशस्य सङ्केतनामा टीकाग्रन्थः लिखितः । एतेन स्पष्टीभवति यत् १२खैष्टशताब्द्याः पूर्वं मम्मटस्य काव्यप्रकाशस्य ख्याति जाता आसीत् । अतः काव्यप्रकाशस्य निर्माणकालः १०५०तमखैष्टाब्दात् ११००तमखैष्टाब्दपर्यन्तं ज्ञातव्यः ।

४. मम्मटाचार्यस्य कृतयः -

(१) काव्यप्रकाशः -

काव्यप्रकाशः भारतीयालङ्कारशास्त्रस्य अद्वितीयः ग्रन्थः । अलङ्कारशास्त्रे काव्यप्रकाशस्य विशिष्टं स्थानं वर्तते । साहित्यशास्त्रे वर्षेभ्यः प्रवाहितः एषः गङ्गाप्रवाहः उत्तरकालिकानां समग्राणां सिद्धान्तानां मूलस्रोतोरूपः काव्यप्रकाशः । वेदान्तदर्शने शारीरकभाष्यस्य यत् महत्त्वं विद्यते, व्याकरणशास्त्रे महाभाष्यस्य यत् अनुपमं स्थानं वर्तते तत् स्थानं साहित्यशास्त्रे मम्मटकृतकाव्यप्रकाशस्य विद्यते । Like the SHAREERAK-BHASHYA in Vedanta or the MAHABHASHYA in

॥ काव्यस्य प्रयोजनानि ॥

संसारस्य कस्यापि स्थावरजङ्गमचेष्टितस्य प्रयोजनं भवति एव। कवेः रचनायाः किमपि प्रयोजनं भवति चेत् सहृदयपाठकाः अभिलषित-वस्तु ज्ञातुं शक्नुवन्ति। अभिलषितेष्टवस्तुविनाशे काव्यं पठितुं ते प्रवृत्ताः न भविष्यन्ति। अतः एका सूक्तिः वर्तते यत्- '**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।**' तर्हि का कथा महनीयमेधाविनः ! तदर्थं मम्मटाचार्यः काव्यप्रकाशस्य प्रथमोल्लासे काव्यस्य प्रयोजनानि प्रदर्शयति यत् - **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥**

(१) यशः

(२) धनम् (धनप्राप्तिः)

(३) आचारपरिज्ञानम् (व्यवहारज्ञानम्)

(४) अनर्थनिवारणम् अमङ्गलनाशो वा

(५) सद्यः परमानन्दः

(६) कान्तासम्मिततया उपदेशः

(१) यशः -

काव्यस्य निर्माणं यशःप्राप्त्यर्थं भवति। यथा कालिदासः भवभूतिः इत्यादयः स्वकाव्येन चिरञ्जीविनीं कीर्तिं प्राप्तवन्तः। तेषाम् अनस्तित्वेऽपि तेषां काव्यग्रन्थाः इदानीमपि यशःसुरभिं वितरन्ति। रससिद्धाः कवीश्वराः सदैव जयन्ति। अतः एव महाकविना महामनीषिणा भर्तृहरिणा उक्तं यत् - **जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः । नास्ति येषां यशःकाये जरामरणजं भयम् ॥**

(२) धनम् - धनप्राप्तिः -

धनप्राप्त्यर्थमपि काव्यरचना भवति। कविगणः आश्रयदातुः गुणगानं करोति स्म। फलरूपेण ते कवयः बहुधनराशिं प्राप्तवन्तः। यथा धावकः तथा च बाणः

॥ अथ काव्यप्रकाशे प्रथमोल्लासः॥

॥ मङ्गलाचरणम् ॥

प्रत्येकस्य शुभकार्यस्य प्रारम्भे ईश्वरस्य स्मरणम् आस्तिकाः कुर्वन्ति । भारतीयसंस्कृतसाहित्येऽपि ग्रान्थारम्भे इष्टदेवतास्मरणरूपा एषा परम्परा वर्तते । एषा परम्परा मङ्गलाचरणनाम्ना प्रचलिता । मङ्गलाचरणेन ग्रन्थनिर्माणे भवितृणां विघ्नानां निवारणं भवति । परम्परानुरूपं मम्मटाचार्येणापि काव्यप्रकाशग्रन्थारम्भे मङ्गलाचरणं कृतम्।

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

मम्मटाचार्यः 'काव्यप्रकाशः' इति नाम्नः साहित्यशास्त्रीय-ग्रन्थस्य निर्माणं कर्तुम् उद्युक्तः । अतः वाङ् मयाधिष्ठातृदेवतायाः इत्युक्ते कवेः भारत्याः स्मरणं करोति । कवेः सृष्टिः ब्रह्मसृष्ट्याः अपेक्षया सर्वोत्कर्षशालिनी भवति । कवेः सृष्ट्याः विशेषताचतुष्टयं वर्तते ।

१. नियतिकृतनियमरहिता

२. ह्लादैकमयी

३. अनन्यपरतन्त्रा

४. नवरसरुचिरा

ध्वन्यालोककारः अनन्दवर्धनाचार्यः कविं प्रजापतिं तथा काव्यं तस्य संसारं कथयति । **अपारे काव्यसंसारे कविरेकः प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते** ॥ मम्मटाचार्यः एकं पदम् अग्रे संस्थाप्य कवेः सृष्टिं ब्रह्मणः सृष्ट्याः अपेक्षया उत्कृष्टां मन्यते । स्वस्य मङ्गलाचरणे ग्रन्थकर्ता स्वस्य इष्टदेवतारूपायाः कवेः भारत्याः सर्वोत्कर्षशालित्वम् अस्ति इति सिद्धं कर्तुं व्यतिरेकालङ्कारस्य प्रयोगं करोति ।

३. अनन्यपरतन्त्रा

'अनन्यपरतन्त्राम्' इति पदेन मम्मटाचार्यः कवेः सृष्ट्याः तृतीयां विशेषतां प्रदयर्शति । ब्रह्मणः सृष्टिः प्रकृति-समवाय्यसमवायि-निमित्तादिकारणैः विना असम्भवा । किन्तु कवेः सृष्टिः स्वप्रतिभाऽऽधारिता वर्तते । कवेः सृष्टिः पराधीना नास्ति । अतः 'अनन्यपरतन्त्रा' । अतः ब्रह्मणः सृष्टेः अपेक्षया उत्कर्षशालिनी । अत्र 'परतन्त्र'इति शब्दस्य अर्थः 'अधीन'इति ग्रहणीयः । अमरकोशानुसारं 'परतन्त्र' इति शब्दः 'अधीन' इत्यर्थवाचकोऽपि अस्ति। **परतन्त्रः पराधीनः परवान्नाथवानपि । अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥**

४. नवरसरुचिरा

कवेः सृष्टेः चतुर्थी विशेषता 'नवरसरुचिराम्' । ब्रह्मणः सृष्टिः षड्रसयुक्ता वर्तते । ते षड् रसाः मधुरः अम्लः लवणः कटुः कषायः तिक्तः इति । सर्वे रसाः प्रियाः न अपि तु केचन अप्रियाः अपि भवन्ति। कवेः सृष्ट्यां शृङ्गारः हास्यः करुणः वीरः भयानकः अद्भुतः बीभत्सः शान्तः च इति नव रसाः वर्तन्ते । ते सर्वे रसाः केवलानन्दरूपाः भवन्ति। नवरसा अपि रुचिरा । अतः ब्रह्मणः सृष्टेः अपेक्षया कवेः सृष्टिः उत्कर्षशालिनी । एवं ब्रह्मणः सृष्टेः अपेक्षया उत्तमां सृष्टिं रचयन्ती कवेः भारती जयति । अत्र 'जयति' इत्युक्ते उत्कर्षशालिनी भवति । अतः मम्मटः नमस्कारं करोति । '**जयत्यर्थेन च नमस्कार आक्षिप्यते**' 'भारती कवेर्जयति' इति वाक्येन कवेः भारतीं प्रति जन्यजनक-भावसम्बन्धः । आराध्यदेवतां सरस्वतीं प्रति आराध्याराधकसम्बन्धः भवति । उपनिषद्वाक्यम् अस्ति यत् - '**कविर्मनीषी परिभूः स्वयम्भूः**'

०००

भवन्ति- (१) प्रभुसम्मितशब्दोपदेशः (२) मित्रसम्मितशब्दोपदेशः (३) कान्तासम्मितशब्दोपदेशः

(१) प्रभुसम्मितशब्दोपदेशः -

वेदादिषु ये उपदेशाः भवन्ति ते राजाज्ञावत् भवन्ति । यथा राजाज्ञायाः उल्लङ्घनं न भवति तथैव वेदशास्त्रादीनां पालनम् अक्षरशः कर्तव्यं भवति । अन्यथा प्रत्यवायदोषः भवेत् । अतः वेदोक्तवाक्यं शब्दप्रधानं वर्तते ।

(२) मित्रसम्मितशब्दोपदेशः -

मित्रम् 'उचितानि कार्याणि कर्तव्यानि अनुचितानि कार्याणि त्यक्तव्यानि' इति उपदेशं करोति । मित्रस्य उपदेशः राजाज्ञावत् न भवति। तस्योपदेशस्यानुष्ठाने न तु शब्दप्रधानता अपि तु अर्थप्रधानता वर्तते । पुराणेतिहासेऽपि अर्थप्रधानतास्ति अत एषा पद्धतिः 'सुहृत्सम्मिता' 'मित्रसम्मिता' इत्युच्यते ।

(३) कान्तासम्मितशब्दोपदेशः -

कान्तासम्मिततया उपदेशः न केवलं शब्दप्रधानः नापि अर्थप्रधानः किन्तु रसव्यञ्जनायुक्तः रससभरः सरलः सुबोधश्च भवति । यथा कान्ता सरस-मधुरशब्दैः उपदेशं करोति 'रामादिवद्वर्तितव्यं न रावणादिवत्' इति । तथैव सरसः काव्योपदेशः सहृदयपाठकस्य चित्तम् आकृष्य सत्कार्ये प्रवृत्तं करोति । अतः अपरशास्त्रेभ्यः काव्यस्य वैशिष्ट्यम् अस्ति । Art for Life Shake.

आरम्भे उक्तं प्रयोजनत्रयं कविनिष्ठम् । अन्ते यदुक्तं प्रयोजनत्रयं तत् पाठकनिष्ठम् । भामहाचार्यः अपि तस्य 'काव्यालङ्कारः' इति ग्रन्थे काव्यप्रयोजनानि वर्णयति -**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति कीर्तिं प्रीतिं च साधु काव्यनिबन्धनम्** ॥ वामनाचार्येण अपि प्रयोजनद्वयं दत्तं यत् - **काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्** ॥ इति ॥ दृष्टा प्रीतिः इत्युक्ते परमानन्दः तथा च अदृष्टा प्रीतिः तु कीर्तिः ॥

ooo

इत्यादय: काव्यरचनाद्वारा '<u>श्रीहर्षात्</u>' विपुलां सम्पत्तिं प्राप्तवन्त: । आधुनिककालेऽपि कवय: 'रॉयल्टी'रूपेण धनं लभन्ते ।

आचारपरिज्ञानम् - व्यवहारज्ञानम् -

व्यवहारज्ञानार्थमपि काव्यनिर्माणं भवति । काव्यद्वारा नृप-मन्त्र्यमात्यादीनां विषये तेषां व्यवहारविषये च उचितं ज्ञानं भवति । काव्यानुशीलनात् युगविशेषस्य समाजस्य आचरणं व्यवहारं ज्ञातुं शक्नुम: । A Literature is a reflection of society

४. अमङ्गलनिवारणम् -

शिवेतरक्षते: कृते काव्यरचना भवति । कवि: स्वकाव्यरचनाद्वारा विशिष्टदेवतां स्तौति । देवता तस्यामङ्गलस्य क्षयं करोति । यथा कविमयूरभट्ट: 'सूर्यशतकम्' इति रचनां विरच्य कुष्ठरोगात् मुक्तिं प्राप्तवान् । भगवान् भास्कर: तस्य स्तुतिं श्रुत्वा प्रसन्न: जात: । अन्ततो गत्वा तं कुष्ठरोगात् मोचितवान् । अन्येषां कवीनां विषये अपि एतादृश्य: कथा: प्रचलिता: सन्ति ।

५. सद्य: परमानन्द:

षट्सु प्रयोजनेषु सद्य: परमानन्द: इति काव्यस्य मुख्यप्रयोजनम् । सहृदयपाठक: काव्यपठने अलौकिकानन्दस्य अनुभवं करोति । तस्मिन् समये स: विगलितवेद्यान्तर: भवति । तदा सांसारिकप्रपञ्चात् स: जलकमलवत् पृथक् एव भवति । अन्येषां वस्तूनां विषये ज्ञानं विगलितम् । ननु एषा आनन्दानुभूतिरेव काव्यस्य 'सकलप्रयोजनमौलिभूतम्' प्रयोजनमस्ति । Art for Art Shake.

६. कान्तासम्मिततया उपदेश:

काव्यप्रयोजनेषु एतत् अन्यतमत् । कान्तासम्मितोपदेश: राजाज्ञाकल्पशब्दप्रधानवेदशास्त्रात्, मित्रतुल्यार्थप्रधानपुराणेतिहासात् विलक्षण: भावनाप्रधान: मधुरशब्दै: असन्मार्गस्थितमनुष्यं '**रामादिवद् वर्तितव्यं न रावणादिवत्**' इति उपदेशात् सन्मार्गाभिमुखं करोति । उपदेशकशब्दा: त्रिप्रकारका:

वा। शास्त्रम् इत्युक्ते छन्दः व्याकरणम् अभिधान-(संज्ञा-शब्द-)कोशः कला धर्मः अर्थः कामः मोक्षः च एतेषां चतुर्वर्गाणां प्रतिपादकग्रन्थाः गजतुरगखड्गादिलक्षण-ग्रन्थाः । काव्यम् अर्थात् महाकवीनां काव्यानि इतिहासादिविषयकग्रन्थाः च । उपर्युक्तलोकशास्त्रकाव्यस्य विमर्शात् व्युत्पत्तिः आगच्छति । सा व्युत्पत्तिः एव निपुणता। लोकव्यवहारस्य शास्त्रस्य काव्यस्य च परिशीलनात् एव व्युत्पत्तिः उत्पन्ना भवति । तया व्युत्पत्त्या काव्यरचना भवति । अतः आनन्दवर्धनः कथयति यत् 'व्युत्पतिम्' अर्थात् निपुणतां विना काव्ये दोषाः भवन्ति ।

(३) अभ्यासः -

ये काव्यरचनां विवेचनां च कर्तुं जानन्ति तेषाम् उपदेशानुगुणं काव्यनिर्माणे मुहुः मुहुः प्रवृत्तिरेव अभ्यासः। आचार्यः मङ्गलः अभ्यासम् अत्युपयोगिनं भावयति । काव्यज्ञानां विदुषां मार्गदर्शनेन पुनः पुनः काव्यनिर्माणेन च गुणदोषाणां ज्ञानं भवति दोषाणां च परिहारः भवति। A Practice Make a Man Perfect.

एतानि त्रीणि कारणानि सम्मिल्य समष्टिरूपेण कारणं भवति। अतः मम्मटः वदति यत् - **'इति हेतुस्तदुद्भवे' - हेतुर्न तु हेतवः ।** अर्थात् शक्तिः निपुणता अभ्यासः च सम्मिल्य हेतुः, न हेतवः। यथा ज्योतिः वर्तिका घृतं इत्येतेषु त्रिषु सम्मिलितेषु 'दीपः' कथ्यते । तथा काव्यरचनायां शक्त्यादयः त्रयः सम्मिल्य एव बीजत्वं धारयन्ति। एकेन काव्यरचना भवितुं न शक्नोति। अत्र दण्डचक्रचीवरन्यायः चरितार्थः भवति। अतः त्रयाणां हेतूनां सम्मिलितावस्था काव्यरचनायाम् अपेक्षिता। प्रतिभा शास्त्रज्ञानम् निरन्तराभ्यासः हि काव्यसाधना इति दण्डिना उक्तम् । आचार्यः वामनः वदति यत् - **'तस्य च कारणं कविगता केवला प्रतिभा ।'** वस्तुतः कवित्वस्य आधारद्वयम् - दर्शनं श्रवणं च। "ऋषयः मन्त्रद्रष्टारः"

०००

॥ काव्यहेतुः ॥

काव्यस्य रचनां यः करोति सः कविः । राजशेखरानुसारं 'कवृ वर्णे' इति धातोः 'इ'प्रत्ययपूर्वकं कविशब्दस्य व्युत्पत्तिः भवति । कविः अर्थात् वर्णनकर्ता रसभावादीनां विमर्शको वा । अतः लोकोत्तरवर्णने निपुणकवेः कर्म तत् काव्यम् । काव्यं सदैव उपादेयं भवति । काव्यप्रकाशे मम्मटः प्रयोजनानि उक्त्वा काव्यस्य उपायानां - कारणानां विवेचनं करोति । कार्यमस्ति चेत् कारणं भवत्येव ।

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

मम्मटानुसारं काव्यसमुल्लासे त्रीणि कारणानि वर्तन्ते । (१) शक्तिः अर्थात् प्रतिभा (२) निपुणता अर्थात् व्युत्पत्तिः (३) अभ्यासः

(१) शक्तिः - प्रतिभा -

मम्मटेन उक्तं यत् 'शक्तिः कवित्वबीजरूपः संस्कारविशेषः । यां विना काव्यं न प्रसरेत्, प्रसृतं वा उपहसनीयं स्यात् ।' अर्थात् कवित्वबीजरूपः विशिष्टः संस्कारः एव शक्तिः । सा एव प्रतिभा । प्रतिभा जन्मजन्मान्तरीय-संस्काराणां परिपाकेण भवति । अतः जन्मजन्मान्तरीयः संस्कारविशेषः एव प्रतिभा । प्रतिभां विना काव्यं न कल्प्यते । वाग्भटाचार्यः अपि वदति "**स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा-सर्वतोमुखी ।**" वामनाचार्यः 'प्रतिभा' इत्यस्य स्थाने 'प्रतिभानम्' इति शब्दं ददाति । प्रतिभानं कवित्वबीजं जन्मजन्मान्तरसंस्कारविशेषः । यस्माद्विना कवित्वस्फुरणं न भवति । रुद्रटानुसारं शक्तिः इत्युक्ते **मनसि सुसमाधिनी सदा, विस्फुरणमनेकधाभिधेयस्य । अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥**

(२) निपुणता - व्युत्पत्तिः -

मम्मटाचार्यः वर्णयति यत् '**लोकशास्त्रकाव्याद्यवेक्षणात् निपुणता ।**' तत्र लोकः अर्थात् स्थावरजङ्गमरूपसंसारस्य व्यवहारः स्थावर-जङ्गमात्मकलोकवृत्तं

(३) पुनः क्वापि अनलङ्कृती शब्दार्थौ -

सालङ्कारौ क्वचित् अलङ्काररहितौ शब्दार्थौ काव्यम्। मम्मटानुसारं काव्ये अलङ्कारस्य वैकल्पिकी स्थितिः भवेत्। काव्यगतौ शब्दार्थौ सर्वथा अलङ्कारयुक्तौ अनावश्यकौ। विशेषपरिस्थित्याम् अलङ्कारस्य अपेक्षा वर्तते। काव्यप्रकाश-प्रदीपटीकाकारानुसारं चमत्कारः एव काव्यस्य सारभूतं तत्त्वम्। चमत्कारोत्पत्तिः रसद्वारा अलङ्कारद्वारा वा भवति। अतः रसे सति अलङ्कारः अनावश्यकः किन्तु यत्र शब्दार्थौ नीरसौ भवतः तत्र अनुपस्थिते अलङ्कारे चमत्कारानुभूतिः कथं भविष्यति? अतः यत्र व्यङ्ग्यरसादीनां स्थितिः विद्यमाना तत्र स्फुटालङ्कारः न भवति तथापि काव्यत्वहानिः न भवति। अर्थात् तत्र स्पष्टालङ्कारः न भवति तथापि काव्यत्वस्य हानिः न भवति। सङ्क्षेपतः तत्र स्पष्टालङ्कारो न भवति तथापि काव्यं भवति। यथा -

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥

एतस्मिन् पद्ये कोऽपि स्पष्टालङ्कारः नास्ति। अत्र रसः प्रधानः वर्तते। अतः रसवदलङ्कारः अपि न भवति। यदा रसः गुणीभूतः भवति तदा रसवदलङ्कारः भवति। विश्वनाथस्य मतानुसारम् एतस्मिन् श्लोके विभावना एवं विशेषोक्तिः इति अलङ्कारद्वयं प्रतिभाति। अतः द्वयोः गुणताप्रधानताभ्यां सन्देहसङ्करः स्पष्टः एव। एवं काव्यप्रकाशकारस्य उपरि विश्वनाथः आक्षेपं करोति। किन्तु मम्मटकृतकाव्यलक्षणस्य यदि गभीरतया चिन्तनं कुर्मः तर्हि एतस्याः समस्यायाः समाधानं भवितुमर्हति। वस्तुतः आचार्यः मम्मटः समन्वयवादी आचार्यः अस्ति। तेन काव्यस्य नानाविधांशानां भिन्न-भिन्नदृष्ट्या विचारः कृतः। यथा - "अदोषं गुणवत्काव्यम् अलङ्कारैरलङ्कृतम् ...." **भोजः**। "शब्दार्थौ सहितौ काव्यम्"-**भामहः**। "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"-**दण्डी**। "रीतिरात्मा काव्यस्य"-**वामनाचार्यः**। "ध्वनिरात्मा काव्यस्य" - **आनन्दवर्धनाचार्यः**। आचार्यमम्मटेन 'सगुणौ' तथा

॥ काव्यलक्षणम् ॥

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' अर्थात् कस्यापि वस्तुनः सिद्धिः लक्षणेन प्रमाणेन वा भवति। इदं नियमानुसारं काव्यप्रयोजनस्य काव्यकारणस्य वा निर्वचनानन्तरं काव्य–पदप्रवृत्तेः निमित्तार्थं व्यवहारार्थं वा मम्मटः काव्यलक्षणस्य निरूपणं करोति। वस्तुतः लक्षणं तदेव कथ्यते यत् अव्याप्त्यतिव्याप्त्यसम्भवाख्यैः त्रिभिः दोषै रहितं स्यात्। अतः तत् सामान्यजनेन कर्तुं दुष्करम्। तथापि काव्यप्रकाशकारस्य यत्नः प्रशंसनीयः। "**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**" अर्थात् – दोषरहिता गुणसहिता तथा साधारणतया अलङ्काररहिता शब्दस्य अर्थस्य च समष्टिः काव्यम्। एतस्मिन् लक्षणे मम्मटाचार्यः शब्दार्थयोः समष्टिं काव्यं कथयति। शब्दार्थयोः समन्वयः काव्ये विराजितः भवति। यथा 'अर्धनारीश्वरः' शिवपार्वत्योः एकीभवनात्मकसम्बन्धः वर्तते तथैव काव्ये शब्दार्थयोः नित्यसमभावः वर्तते। केवलः शब्दः अर्थः वा काव्यं भवितुं न शक्नोति। किन्तु शब्दार्थौ त्रिभिः विशेषणैः युक्तौ भवेताम्। (१) अदोषौ (२) सगुणौ (३) अनलङ्कृती पुनः क्वापि

(१) अदोषौ अर्थात् दोषरहितौ शब्दार्थौ –

सप्तमे उल्लासे मम्मटः कथयति – '**मुख्यार्थहतिः दोषः**' विश्वनाथानुसारं 'रसापकर्षका दोषाः'। रसविघातकाः रसप्रतीतिबाधकाः रसापकर्षकाः दोषाः काव्ये न भवेयुः। यद्यपि सर्वथा निर्दुष्टं काव्यं तु दुर्लभं तथापि काव्यत्वविघातक–च्युतसंस्कारादिप्रबलदोषरहितौ शब्दार्थौ काव्यम्। अतः 'अदोषौ' इति पदं नञर्थे ग्रहीतव्यम्। कीटानुविद्धरत्नवत् यत्र काव्ये रसानुभूतिः स्पष्टा भवति तत्र दोषे सति काव्यत्वस्य हानिः न भवति।

(२) सगुणौ अर्थात् गुणसहितौ शब्दार्थौ –

शब्दार्थौ गुणयुक्तौ भवेताम्। माधुर्यम् ओजः प्रसादादिगुणाः काव्यात्मभूतस्य रसस्य धर्माः। गुणाः रसधर्माः। अतः रसैः सह तेषां साक्षात् सम्बन्धः। अतः प्रधानरूपेण परम्परया वा ते गुणाः शब्दार्थयोः अपि वर्तन्ते। शब्दार्थाभ्यां काव्यं सम्पन्नं भवति तत्र गुणानां स्थितिः आवश्यकी।

"निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥"

एतस्मिन् श्लोके 'अधम' इति पदेन लक्षणाशक्तिद्वारा वापी-गमनस्य निषेधात् दूत्याः नायकस्यान्तिकगमनं प्रधानः व्यङ्ग्यः वर्तते । अतः ध्वनिकाव्यम् । अत्र वाच्यार्थः 'वापीस्नानम्' इत्यस्य अपेक्षया व्यङ्ग्यार्थः 'तदन्तिकगमनम्' इति चमत्कारयुक्तः अर्थः । अतः एतत् पद्यं ध्वनिकाव्यस्य उदाहरणम् अस्ति ।

२. गुणीभूतव्यङ्ग्यकाव्यम् -

यत्र व्यङ्ग्यार्थः वाच्यार्थस्य अपेक्षया अधिकचमत्कारयुक्तः न भवति तर्हि तद् 'गुणीभूतव्यङ्ग्यकाव्यम्' उच्यते । **'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।'** अर्थात् वाच्यार्थात् अधिकचमत्कारः व्यङ्ग्ये न भवति तदा तद् गुणीभूतव्यङ्ग्यनामकं मध्यमकाव्यम् इति कथ्यते । **गुणीभूतव्यङ्ग्यकाव्यस्य उदाहरणम् एतत् -**

"ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥"

ग्रामतरुणस्य हस्ते नववञ्जुलमञ्जरीं दृष्ट्वा ग्रामतरुण्याः मुखच्छाया मलिना भवति । एतस्मिन् श्लोके नायिका (तरुणी) सङ्केतस्थानं न गतवती इति व्यङ्ग्यार्थः अस्ति । नववञ्जुलमञ्जरीं दृष्ट्वा मुखच्छाया मलिना भवति इति वाच्यार्थस्य अपेक्षया व्यङ्ग्यार्थः चमत्कारजनकः नास्ति । अतः एतद् गुणीभूतव्यङ्ग्यं मध्यमकाव्यं वा भवति ।

३. चित्रकाव्यम् -

यत्र व्यङ्ग्यार्थस्य सर्वथाऽभावः भवति अथवा व्यङ्ग्यार्थः अस्पष्टः भवति अथवा केवलं शब्दालङ्कारस्यार्थालङ्कारस्य वा प्रधानता वर्तते तत् 'चित्रकाव्यम्'

च 'अदोषौ' इति पदद्वयस्य माध्यमेन पूर्ववर्तिकाव्यलक्षणानां समाहारं कृत्वा एकः नूतनः दृष्टिकोणः – विचारः प्रस्थापितः । गुणदोषाणां प्रश्नस्य प्रस्थापनकर्ता सः प्रथमः लक्षणकारः । पूर्ववर्तिनां सर्वेषां लक्षणानां साररूपं मम्मटकृतम् एतत् लक्षणं सर्वथा परिमार्जितं तार्किकम् आदरणीयं च वर्तते ।

०००

॥ काव्यभेदाः ॥

काव्यप्रकाशस्य प्रथमोल्लासस्य अन्तिमे भागे मम्मटाचार्यः काव्यभेदानां निरूपणं करोति । काव्यस्य त्रयः भेदाः सन्ति । १. ध्वनिकाव्यम् अथवा उत्तमकाव्यम् । २. गुणीभूतव्यङ्ग्यकाव्यम् अथवा मध्यमकाव्यम् । ३. चित्रकाव्यम् अथवा अधमकाव्यम्

१. ध्वनिकाव्यम् अथवा उत्तमकाव्यम् –

यत्र वाच्यार्थतः व्यङ्ग्यार्थः अधिकचमत्काररूपः भवति तद् 'ध्वनिकाव्यम्' इति कथ्यते । मम्मटचार्यः ध्वनिकाव्यस्य लक्षणं ददाति यत् – '**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ॥४॥**' अर्थात् वाच्यार्थस्य अपेक्षया व्यङ्ग्यार्थे अधिकं चमत्कारः वर्तते तत् काव्यम् उत्तमकाव्यम् । बुधैः विद्वद्भिः तत् ध्वनिकाव्यम् इति उच्यते । वस्तुतः साहित्यशास्त्रे ध्वनिसिद्धान्तस्य स्थापना आनन्दवर्धना-चार्येण कृता किन्तु सर्वप्रथमं वैयाकरणैः स्फोटाभिव्यञ्जकशब्दस्य कृते 'ध्वनिः' इति शब्दस्य प्रयोगः कृतः । तेषां मतानुसारं स्फोटः अर्थात् – 'स्फुटति अर्थो यस्मात् सः स्फोटः ।' तथैव सहित्यशास्त्रेऽपि व्यङ्ग्यार्थस्य अभिव्यञ्जनां कर्तुं ये शब्दार्थाः प्रयुज्यन्ते तेषां कृते आनन्दवर्धनादि-पण्डिताः ध्वनिशब्दस्य प्रयोगं कुर्वन्ति । **ध्वनिकाव्यस्य उदाहरणम् एतत्** –

॥ अथ द्वितीयोल्लासः ॥

क्रमेण शब्दार्थयोः स्वरूपमाह –

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।

वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित् ॥६॥

प्रथमोल्लासे 'शब्दार्थयोः समष्टिः काव्यमुच्यते' इति काव्य-लक्षणे मम्मटेनोक्तम् । अथ ग्रन्थकारः द्वितीयोल्लासे शब्दार्थयोः स्वरूपस्य परिचयं कारयति । अतः 'शब्दार्थस्वरूपनिर्णयः' इत्यभिधानं द्वितीयस्य उल्लासस्य तेन कृतम् । उपाधिभेदात् शब्दस्य त्रयः प्रकाराः– वाचकः लाक्षणिकः व्यञ्जकश्च । वाच्यादयः तदर्थाः अपि त्रिधा – वाच्यार्थः लक्ष्यार्थः व्यङ्ग्यार्थः चेति । शाब्दबोधे त्रीणि शास्त्राणि आवश्यकानि – पद-प्रमाण-वाक्यशास्त्रम् । '**तात्पर्यार्थोऽपि केषुचित्**' इत्यत्र ग्रन्थकारः अर्थ-विवेचनस्य कृते मीमांसकानां वाक्यशास्त्रस्य विशेषतः उल्लेखं करोति । वाक्यार्थविषये मतद्वयं प्रसिद्धम् – अभिहितान्वयवादिमतम् अन्विताभिधानवादिमतं च ।

शाब्दबोधस्य कृते त्रीणि शास्त्राणि

- **पदशास्त्रम्** (पदपदार्थयोः विवेचनम् अतः व्याकरणशास्त्रम्)
- **प्रमाणशास्त्रम्** (विशेषतः प्रमाणानां विवेचनम् अतः न्यायशास्त्रम्)
- **वाक्यशास्त्रम्** (विशेषतः वाक्यार्थस्य विवेचनम् अतःमीमांसाशास्त्रम्)
  - **१. अभिहितान्वयवादः** (कुमारिलभट्टादीनाम्)
  - **२. अन्विताभिधानवादः** (प्रभाकरादीनाम्)

१. अभिहितान्वयवादः –

कुमारिलभट्ट–पार्थसारथिमिश्रादयः प्रसिद्धाः अभिहितान्वय-वादिनः । अभिहितान्वयवादिनां मतानुसारं प्रथमं पदैः पदार्थानां बोधः भवति अर्थात्

अथवा अधमकाव्यम् उच्यते। मम्मटाचार्यः चित्रकाव्यस्य लक्षणम् उदाहरणं च एवं दर्शयति – "**शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥ ५॥**" अर्थात् व्यङ्ग्यार्थरहितं शब्दचित्रं तथा अर्थचित्रम् इति द्विप्रकारकम् अधमकाव्यं कथ्यते। शब्दचित्रं यथा –

"स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥"

यद्यपि एतस्मिन् श्लोके भक्तस्य मन्दाकिनीविषयकः पूज्यभावः प्रतीयते तथापि अनुप्रासालङ्कारस्य पुरतः सः भावः तिरोहितः जायते। अत्र कवेः यत्नः अनुप्रासालङ्कारे अस्ति। अतः अत्र शब्दचित्रम्। **अर्थचित्रं यथा** –

विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम्।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ॥

एतस्मिन् उदाहरणे '**भिया निमीलिताक्षीव अमरावती जाता**' इत्यत्र उत्प्रेक्षालङ्कारः वर्तते। यद्यपि एतस्मिन् पद्ये हयग्रीवस्य प्रभावातिशयवर्णनात् वीररसोऽभिव्यक्तो भवति तथापि कवेः तात्पर्यम् उत्प्रेक्षालङ्कारे अस्ति अतः एतत् अर्थचित्रस्य उदाहरणं भवति।

'केचिच्चित्राख्यं तृतीयं काव्यमिच्छन्ति' इति उक्त्वा विश्वनाथः साहित्यदर्पणे चित्रकाव्ये अरुचिं प्रकटयति। पण्डितराजेन जगन्नाथेन काव्यस्य चत्वारः भेदाः उक्ताः। ते यथा–उत्तमोत्तमकाव्यम्, उत्तमकाव्यम्, मध्यमकाव्यम्, अधमकाव्यं चेति। ध्वन्यालोके आनन्दवर्धनाचार्यः अपि काव्यस्य भेदानां विषये वदति यत् – "**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते उभे काव्ये।**"

॥ इति ॥

शाकिलनाथमिश्रादयः अन्विताभिधानवादिनः । तेषां मतानुसारं प्रथमम् अभिहितपदार्थोपस्थितिः भवति अनन्तरं तेषामन्वयः इति न अपि तु प्रथमत एव अन्वितपदार्थानां बोधः अभिधाद्वारा भवति । अतः एते अन्विताभिधानवादिनः ।

'वाच्य एव वाक्यार्थ' इति अन्विताभिधानवादिनः । प्रभाकरानुसारं पदार्थानां प्रतीतिः सङ्केतग्रहानन्तरं भवति । सङ्केतग्रहणं व्यवहारेण भवति । यथा शिशुः (बालकः) 'कः शब्दः कस्य बोधकः' इति न जानाति । सः ज्येष्ठात् 'गाम् आनय" इति आदेशं शृणोति तथा च मध्यमात् गवानयनव्यापारं पश्यति । तेन तस्य मनसि समष्टिभूतवाक्यात् समष्टिभूतार्थस्य संस्कारः भवति । एवं वारं वारं व्यवहारात् सङ्केतग्रहः भवति । एतत् सङ्केतग्रहणम् अन्वितपदार्थे भवति । पदार्थानामन्वयः तु पूर्वसिद्ध एव । अतः तेषां कृते 'तात्पर्याख्या शक्तिः' न अपेक्षिता इति अन्विताभिधानवादिनः ।

॥ अर्थत्रयस्य व्यञ्जकत्वम् ॥

शब्दः त्रिधा – वाचकः लक्षकः व्यञ्जकश्चेति । तथैव अर्थस्यापि प्रकारत्रयम् – वाच्यार्थः लक्ष्यार्थः व्यङ्ग्यार्थश्चेति । त्रिषु अर्थेषु व्यञ्जकत्वं वर्तते । अतः मम्मटाचार्यः काव्यप्रकाशस्य द्वितीयोल्लासे सर्वेषामर्थानां व्यञ्जकत्वं सोदाहरणं स्पष्टीकरोति । "**सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते** ।" साहित्यशास्त्रे प्रायः सर्वेषामर्थानां व्यञ्जकत्वं मन्यते । वाच्यस्य व्यञ्जकत्वं यथा –

मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।
तद्भण किं करणीयमेवमेव न वासरः स्थायी ॥

अत्र स्वच्छन्दतया विहरणं कर्तुं वधूः उपपतिं प्रति गन्तुम् इच्छति इति व्यङ्ग्यार्थः । लक्ष्यस्य व्यञ्जकत्वं यथा –

साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते ।
सद्भावस्नेहकरणीयसदृशकं तावद् विरचितं त्वया ॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितम् इति लक्ष्यम् । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् । व्यङ्ग्यस्य व्यञ्जकत्वं यथा –

अभिधाशक्तिद्वारा अभिहितपदार्थानां बोधः भवति । अनन्तरं तात्पर्यशक्तिद्वारा पदार्थानां परस्परान्वयः सम्बन्धः वा भवति, तेन वाक्यार्थः प्रतीयते । एवं वाक्यार्थबोधस्य कृते अभिहितपदार्थानाम् अन्वयेन कुमारिलभट्टादीनाम् एषः सिद्धान्तः '**अभिहितान्वयवादः**' इति नाम्ना व्यवह्रियते । तेषां मतानुसारं पदार्थानां परस्परसम्बन्धः पदैः न अपि तु वक्तुः तात्पर्यात् । अतः 'तात्पर्यार्थः' स एव वाक्यार्थः । *"आकाङ्क्षा–योग्यता–सन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुः अपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहितान्वयवादिनां मतम् ।"* – **वृत्तिः काव्यप्रकाशे** । अत्राशयः एवं वर्तते पदार्थानां परस्परसम्बन्धः पदैः भवति तथापि आकाङ्क्षादिबलात् भासते । सः तात्पर्यार्थः वाक्यार्थश्च स एव ।

आकाङ्क्षा – येन पदेन विना यस्य पदस्य अन्वयानुभावकत्वं तेन पदेन सह तस्याकाङ्क्षा । **यथा – रामः गच्छति । एकं पदं श्रुत्वा अन्यानि पदानि श्रोतुम् इच्छा जिज्ञासा भवति सा आकाङ्क्षा । आकाङ्क्षारहितपदैः वाक्यं न भवति । यथा – 'गौरश्वः पुरुषो हस्ती'** ।


योग्यता – पदार्थानां परस्परसम्बन्धे बाधाभावो योग्यता । यदि पदार्थानां परस्परान्वये बाधा भवति चेत् वाक्यार्थबोधो न भवति । यथा – 'वह्निना सिञ्चति' । वह्निना सिञ्चनं न शक्यम्, अतः द्वयोः पदयोः सम्बन्धे बाधा भवति । अत्र योग्यतायाः अभावः ।

सन्निधिः – पदानामविलम्बेनोच्चारणं सन्निधिः । अर्थात् एकपुरुषद्वारा अविलम्बेन पदानामुच्चारणम् । एवम् आकाङ्क्षा–योग्यता–सन्निधिवशात् यः पदसमुदायः भवति स एव वाक्यार्थः । सर्वप्रथमम् अभिधाशक्तिद्वारा अन्वितपदार्थः उपस्थितः भवति । तदनन्तरं पदानाम् आकाङ्क्षा–योग्यता–सन्निधिबलात् तात्पर्यशक्तिद्वारा पदार्थानां परस्परसम्बन्धरूपवाक्यार्थस्य बोधः भवती इति अभिहितान्वयवादिनः ।

२. अन्विताभिधानवादः –

मीमांसकानां द्वितीयः सिद्धान्तः अन्विताभिधानवादः । प्रभाकर–

भवितुमर्हन्ति। अतः सङ्केतग्रहः व्यक्तेः उपाधिभूतजाति-गुण-क्रिया-यदृच्छारूपधर्मेषु भवति। अतः ग्रन्थकारः लिखति यत् - **सङ्केतितश्चतुर्भेदः** - जातिः गुणः क्रिया यदृच्छा च। उपाधिः द्विविधः (१) वस्तुधर्मः (२) वक्तृयदृच्छासन्निवेशितः। **वस्तुधर्मोऽपि द्विविधः**-(१) सिद्धः (२) साध्यः। **सिद्धोऽपि द्विविधः**- (१) पदार्थस्य प्राणप्रदः (२) विशेषाधानहेतुः।



॥ सङ्केतग्रहविषये विविधानि मतानि ॥

१. मीमांसकाः

'जात्यादिर्जातिरेव वा' इत्यत्र **'जात्यादिः'** इति पक्षः वैयाकरणानाम् आलङ्कारिकाणां च वर्तते। 'जातिरेव वा' इति द्वितीयपक्षः मीमांसकानाम्। तेषां मतानुसारं जातिमध्ये सङ्केतग्रहः भवति। अर्थात् केवलजातिः शब्दस्य प्रवृत्तिनिमित्तार्थं योग्या। जातिशब्दवत् गुण-क्रिया-यदृच्छामध्येऽपि जातिमध्ये सङ्केतः स्वीकरणीयः। अनुगतस्य एकाकारप्रतीतेः वा कारणं 'सामान्यम्' अर्थात् जातिः इत्युच्यते। **'अनुवृत्तिप्रत्ययहेतुः सामान्यम्।' यथा - घटत्वं शुक्लत्वं पावकत्वम् इत्यादि।** एवं सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तम् इति अन्येषां मतम्।

२. नैयायिकाः -

नै[illegible]ानां मतानुसारं सङ्केतग्रहः यथा जातिमध्ये न भवति तथैव

पश्य निश्चलनिस्पन्दा बिसिनीपत्रे राजते बलाका ।

निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥

अत्र '**निस्पन्दा बलाका**' इति वाच्यार्थः । तेन आश्वस्तत्वं लक्ष्यते । तेन च 'जनरहितत्वम्' इति व्यङ्ग्यार्थः । तेन व्यङ्ग्यार्थेन 'सङ्केतस्थानमेतद्' इति द्वितीयः व्यङ्ग्यार्थः उद्भवति ।

॥ वाचकशब्दस्य स्वरूपम् ॥ (सङ्केतः)

"**साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः**" अभिधाशक्तिद्वारा साक्षात् सङ्केतितम् अर्थं यः वदति सः वाचकः। लोकव्यवहारे सङ्केतसाहाय्येनैव शब्दः अर्थविशेषं प्रतिपादयति। सङ्केतग्रहं विना शब्दस्यार्थप्रतीतिः न भवति । अतः यत्राव्यवधानेन यस्य सङ्केतो गृह्यते स तस्य वाचकः । सङ्केतग्रहस्य बहवः उपायाः किन्तु लोकव्यवहारः तस्य प्रधानं साधनम् ।

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"

अधिकानां शब्दानां सङ्केतग्रहणं लोकव्यवहारेण भवति ।

॥ सङ्केतग्रहस्य विषयः उपाधिभेदात् चतुर्धा विभक्तः ॥

"**सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।**" 'सङ्केतग्रहणं कुत्र भवति?'इति प्रश्नः, व्यक्तिमध्ये जातिमध्ये वा? प्रवृत्तिनिवृत्तियोग्या व्यक्तिः एव । साधारणरूपेण व्यवहारः तु व्यक्तिमध्ये भवति । अतः सङ्केतग्रहणेन व्यक्तिमध्ये भवितव्यम् । किन्तु आनन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते । **द्वितीयम्** – 'गौ शुक्लः चलो डित्थः' इत्यादीनां विषयविभागो न प्राप्नोति । महाभाष्यकारेण 'चतुष्टयी शब्दानां प्रवृत्तिः । जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाः' इति चत्वारः विभागाः कृताः। यदि व्यक्तिमध्ये सङ्केतं स्वीकुर्मः चेत् चलः डित्थः इत्यादिशब्देषु व्यक्तेः बोधः भविष्यति । 'गौः' इति शब्दः जातिवाचकः । 'शुक्लः' इति शब्दः गुणवाचकः । 'चलः' इति शब्दः क्रियावाचकः । 'डित्थः' इति यदृच्छावाचकः । इति विभागाः न

१. मुख्यार्थस्य बाधः – अन्वयानुपपत्तिद्वारा अथवा तात्पर्या-नुपपत्तिद्वारा भवति। यथा 'गङ्गायां घोषः' । एतस्मिन् उदाहरणे गङ्गायाः अर्थः 'जलस्य प्रवाहः' इति भवति। घोषस्य अर्थः 'कुटिरम्' इति । जलस्य प्रवाहे कुटिरं (घोषः) भवितुं न शक्नोति। अतः अन्वयः अनुपपन्नः भवति। अन्वयानुपपत्तिद्वारा गङ्गापदं लक्षणाद्वारा 'तटरूपस्य' अर्थस्य बोधकं भवति। परन्तु नागेशभट्टेन 'तात्पर्यानुपपत्तिः लक्षणायाः बीजम्' इति उक्तम् । यथा – 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र 'काकेभ्य' इति पदस्य तात्पर्यानुपपत्तिद्वारा 'दध्युपघातकेभ्यः' इति अर्थे लक्षणा भवति। अतः तात्पर्यानुपपत्तिरपि लक्षणायाः बीजम् ।

२. लक्ष्यार्थस्य मुख्यार्थेन सह सम्बन्धः ।

यथा – 'कर्मणि कुशलः' इत्यत्र 'कुशान् लाति आदत्ते इति कुशलः' इति व्युत्पतेः अनुसारं 'कुशलः' इत्यस्य बाधः भूत्वा विवेचकत्वसम्बन्धेन अन्यार्थः प्रतीयते। अत्र मुख्यार्थेन सह लक्ष्यार्थस्य विवेचकसम्बन्धः । तथैव '**गङ्गायां घोषः**' इत्यत्र सामीप्यसम्बन्धः वर्तते ।

३. रूढिः प्रयोजनं वा ।

'कर्मणि कुशलः' इत्यत्र रूढिवशात् 'कुशलः' इति पदं 'दक्षः' इत्यर्थे रूढं भवति। 'गङ्गातटे घोषः' इत्यत्र शैत्यपावनत्वादिरूप-प्रयोजनात् 'प्रवाहः' इति पदस्य 'तटम्' इत्यर्थे बोधः भवति। एवं मुख्यार्थबाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः प्रयोजनात् वा मुख्येन अमुख्योऽर्थः लक्ष्यते यत् स आरोपितः व्यापारः 'लक्षणा' इति उच्यते ।

॥ लक्षणा तेन षड्विधा ॥ (लक्षणायाः षट् प्रकाराः)

शुद्धा लक्षणा द्विधा – उपादानलक्षणा लक्षणलक्षणा च । अत उक्तं मम्मटभट्टेन यत्

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥१०॥

व्यक्तिमध्येऽपि न भवति। आनन्त्यव्यभिचारयोः दोषात् व्यक्तिमध्ये सङ्केतग्रहः न। केवलजात्याः उपस्थितिवशात् केवलजात्यां सङ्केतग्रहः न। यदि जात्यां सङ्केतग्रहं कृत्वा व्यक्तेः आक्षेपात् ज्ञानं स्वीकुर्मः चेत् '**शाब्दी हि आकाङ्क्षा शब्देनैव पूर्यते**।' इति नियमानुसारम् आक्षेप-लभ्यार्थस्य शाब्दबोधेऽन्वयः न भविष्यति। अतः 'व्यक्त्याकृतिजातयस्तु पदार्थः' इति सिद्धान्तानुसारं 'तद्वान्' अर्थात् जातिविशिष्टव्यक्तिमध्ये सङ्केतग्रहणम् उचितम्।

३. अपोहवादः (बौद्धमतम्)

बौद्धानां मतानुसारं शब्दस्य अर्थः 'अपोहः' भवति। 'अपोहः' अर्थात् 'अतद्व्यावृत्तिः तद्भिन्नभिन्नत्वं वा।' दशघटेषु घटः घटः एवं एकाकारप्रतीतिः भवति। तस्याः च कारणं नैयायिकानाम् अनुसारं घटत्व-सामान्यम्। तथैव दशसु व्यक्तिषु एतादृशी एकाकारप्रतीतिः भवति तस्याः कारणं बौद्धानाम् अनुसारम् 'अपोहः' अथवा 'अघटव्यावृत्तिः' अर्थात् 'घटभिन्नभिन्नत्वम्' इति। एवं सङ्केतग्रहस्य विषयीभूतपदार्थः अपोहः इति बौद्धमतम्। "**स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते**" अर्थात् - सः साक्षात् सङ्केतितः अर्थः एव मुख्यार्थः। तस्य मुख्यार्थस्य बोधने यः व्यापारः सा अभिधावृत्तिः।

॥ लक्षणाशक्तिः ॥ (लक्षणाव्यापारः)

अभिधाशक्तिः वाच्यार्थबोधिका किन्तु यत्र मुख्यार्थस्य वाक्ये अन्यैः पदैः सह अन्वयः न भवति अथवा तैः तात्पर्योपपत्तिः न भवति तत्र रूढिवशात् प्रयोजनवशात् मुख्यार्थसम्बन्धान्यार्थस्य प्रतीतिः भवितुं शक्नोति। सा अन्यार्थबोधिका शक्तिः हि 'लक्षणा' इति उच्यते।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽऽरोपिता क्रिया॥९॥

लक्षणाव्यापारस्य कृते त्रीणि कारणानि आवश्यकानि - १. मुख्यार्थस्य २. लक्ष्यार्थस्य मुख्यार्थेन सह सम्बन्धः। ३. रूढिः प्रयोजनं वा।

'गौरनुबन्ध्यः' इति उपादानलक्षणायाः उदाहरणं नास्ति। नात्र प्रयोजनम् अस्ति न वा रूढिरियम्। व्यक्तिं विना जातिः न सम्भवति। अतः अविनाभावात् जात्या व्यक्तिः आक्षिप्यते यथा – 'क्रियताम्' इत्यत्र कर्ता। 'कुरु' इत्यत्र कर्म। 'प्रविश', 'पिण्डीम्' इत्यादौ 'गृहम्', 'भक्षय' इत्यादिषु च। अत्र 'क्रियताम्', 'कुरु', 'प्रविश' इत्यादिषु अपूर्णेषु वाक्येषु अवशिष्टानाम् अंशानां पूर्तिः अध्याहारेण आक्षेपेण वा भवति।

२. **'पीनो देवदत्तो दिवा न भुङ्क्ते'** – इत्यत्रापि उपादानलक्षणा न भवति। अत्र रात्रिभोजनं लक्षणाद्वारा उपस्थितं न भवति। एषः श्रुतार्थापत्तेः अर्थापत्तेः वा विषयः। प्रत्यक्षानुमानादिवत् अर्थापत्तिः अपि मीमांसकानुसारं प्रमाणम्। **'अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनम् अर्थापत्तिः।'** इति। अर्थात् – अनुपपद्यमानार्थं दृष्ट्वा उपपादनार्थस्य कल्पना येन प्रमाणेन भवति सा अर्थापत्तिः। 'पीनो देवदत्तः' इति अनुपपद्यमानार्थः। तथा च 'रात्रिभोजनम्' इति उपपादनार्थः। अतः अत्र पीनत्वं दृष्ट्वा रात्रिभोजनमिति उपपादनार्थस्य बोधः अर्थापत्त्या भवति। वस्तुतः अर्थापत्तिरपि द्विविधा – दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च। इति॥ **लक्षणायाः मुख्यतया भेदद्वयम्**–(१) शुद्धा (२) गौणी। उपचारेण अमिश्रितत्वात् 'शुद्धा' भवति। उपचारयुक्तलक्षणा 'गौणी' इति कथ्यते।

उपचारस्य लक्षणम् –

"उपचारो हि नाम अत्यन्तं विशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्"। अर्थात् – सादृश्यातिशयात् भिन्नपदार्थयोः भेदप्रतीतिः न भवति तदा उपचारः कथ्यते। यथा 'सिंहो माणवकः' इति। **पुनः शुद्धायाः गौण्याः च भेदद्वयम्** – (१) सारोपा (२) साध्यवसाना च। इत्थम् आहत्य चत्वारः भेदाः भवन्ति। सा चतुर्विधा लक्षणा यथा– (१) शुद्धा सारोपा (२) शुद्धा साध्यवसाना (३) गौणी सारोपा (४) गौणी साध्यवसाना **आह च मम्मटः सारोपायाः लक्षणम्– "सारोपाऽन्या तु यत्रोक्तौ विषयी विषयस्तथा"**। यत्र आरोप्यमाणः विषयी (उपमानम्) तथा च आरोपविषयः (उपमेयम्) शब्दतः उक्तः स्यात् तत्र 'सारोपा' भवति। यथा – 'गौः वाहीकः', 'आयुर्घृतम्'।

१. उपादानलक्षणा - 'स्वसिद्धये पराक्षेपः'

यत्र शब्दः स्वान्वयस्य सिद्धये अन्यार्थस्य आक्षेपं स्वीकरोति तथा च स्वयमपि तिष्ठति तत्र 'उपादानलक्षणा' इति कथ्यते। उपादानलक्षणायां मुख्यार्थस्यापि उपादानं भवति। यथा - 'कुन्ताः प्रविशन्ति।' अथवा 'यष्टयः प्रविशन्ति।' एतस्मिन् उदाहरणे 'कुन्ता' इति पदम् अचेतनार्थस्य वाचकम्। तस्मिन् प्रवेशक्रियायाः अन्वयः न भवति। अतः मुख्यार्थस्य बाधेन 'कुन्ताः' इति पदं स्वान्वयार्थस्य सिद्धये 'पुरुषाः' इति पदस्य आक्षेपं स्वीकरोति। एवं 'कुन्त-'शब्दः 'कुन्ताधारिपुरुषाणां' बोधकः भवति। अतः 'कुन्ताः प्रविशन्ति' इत्युक्ते 'कुन्ताधारिणः पुरुषाः प्रविशन्ति' इत्यर्थः।

२. लक्षणलक्षणा - 'परार्थं स्वसमर्पणम्'

यत्र वाक्ये प्रयुज्यमानः कश्चन शब्दः वाक्यस्य अन्यशब्दान्वयस्य सिद्ध्यर्थं स्वार्थं परित्यज्य अन्यार्थबोधकः भवति तत्र 'लक्षणलक्षणा' भवति। **यथा - 'गङ्गायां घोषः'** एतस्मिन् उदाहरणे वाक्ये प्रयुज्यमानः घोष-शब्दः आधेयत्व-रूपान्वयस्य प्रतिपादनं कर्तुं (सिद्ध्यर्थं) जल-प्रवाहरूपमुख्यार्थं परित्यज्य सामीप्यसम्बन्धात् 'तटे' इति अन्यार्थस्य बोधकः भवति अतः लक्षणलक्षणा।

॥ मुकुलभट्टमतस्य उपादानलक्षणायाः उदाहरणद्वयस्य विवेचनम् ॥

मुकुलभट्टद्वारा लिखितः ग्रन्थः 'अभिधावृत्तिमातृका' इति। सः अभिधावादी अस्ति। अभिधां विना अपरा शक्तिः एव नास्ति इति तस्य मतम्। तस्य मतानुसारं (१) 'गौः अनुबन्ध्यः' तथा च (२) 'पीनो देवदत्तः दिवा न भुङ्क्ते' इत्यत्र उदाहरणद्वये उपादानलक्षणा वर्तते।

१. **'गौः अनुबन्ध्यः'** - इत्यत्र मीमांसकानां मतानुसारम् उपादानलक्षणा। कथम् इति चेत् 'गौः' पदस्य वाच्यार्थः 'गोत्वम्' इति भवति। गोत्वे क्रिया (आलभनक्रिया) भवितुं न शक्नोति। अतः मुख्यार्थबाधः। अन्वयसिद्ध्यर्थं व्यक्तेः बोधः आक्षेपेण स्वीक्रियते। अतः उपादानलक्षणायाः उदाहरणम् इदम्। मम्मटानुसारं

व्यङ्ग्येन सहिता रूढौ सहिता तु प्रयोजने ।
तच्च गूढमगूढं वा तदेषा कथिता त्रिधा ॥

लक्षणामूला व्यञ्जना त्रिधा भवति – अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति । 'गङ्गायां घोषः' इत्यत्र गङ्गाप्रवाहरूपवाच्यार्थस्य प्रतीतिः अभिधया भवति । तटरूपलक्ष्यार्थस्य प्रतीतिः लक्षणाशक्तिद्वारा भवति। किन्तु शैत्यपावनत्वादिरूपधर्माणां प्रतीतेः कृते लक्षणामूलकव्यञ्जनाव्यापारः एव प्रवर्तते। 'तत्र व्यापारो व्यञ्जनात्मकः'। यत्र शैत्यपावनत्वादिप्रयोजनरूपव्यङ्ग्यार्थं लक्ष्यार्थं वक्तुं न शक्नुमः । यत् यस्य प्रतीतिं कारयितुं लक्षणा समुपास्यते तत्र केवलशब्दगम्यप्रयोजनविषये व्यञ्जनात् अपरः व्यापारः न भवत्येव।

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥"

प्रयोजनरूपार्थप्रतीतेः मुख्यार्थबाधादित्रयाणां हेतूनां प्रयोगः न भवति । 'हेत्वभावान्न लक्षणा' । अतः मम्मटाचार्यः अस्मिन् विषये स्पष्टम् उल्लिखति यत् –

"लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥"

प्रयोजनसहितं तटं लक्ष्यार्थं कथयितुं न शक्नुमः । यतो हि ज्ञानस्य विषयः अन्यः फलं च अन्यत्।

"प्रयोजनेन सहितं लक्षणीयं न युज्यते ।
ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ॥"

शैत्यपावनत्वादयः विशेषाः । ते व्यञ्जनाव्यापारेण गम्याः । अतः व्यञ्जना अवश्यमेव स्वीकरणीया। इति॥

॥ अभिधामूला व्यञ्जना ॥

शैत्यपावनत्वं बोधयितुं या शक्तिः कार्यरूपा सा शक्तिः व्यञ्जना। तिसृषु शक्तिषु एषा सर्वश्रेष्ठा । व्यञ्जना द्विधा - शाब्दी आर्थी च । पुनः शाब्दी द्विधा - लक्षणामूला अभिधामूला च । तत्र अभिधामूला यथा -

"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।

संयोगाद्यैरवाच्यार्थधीकृद्व्यपृतिरञ्जनम् ॥"

अर्थात् - संयोगाद्यैः अनेकार्थकशब्दानां वाचकत्वे नियन्त्रिते वाच्यार्थभिन्नार्थप्रतीतिं कारयितुं यः शब्दव्यापारः भवति सा 'शाब्दी व्यञ्जना' इति कथ्यते । अत्र 'संयोगाद्यैः' इत्यस्य अभिप्रायार्थं भर्तृहरिणा लिखितात् वाक्यपदीयात् उद्धृतं कारिकाद्वयम् -

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"

अनेकार्थकानां शब्दानां नियन्त्रणं कर्तुं भर्तृहरिः चतुर्दश कारणानि प्रदर्शयति। संयोगः विप्रयोगः (वियोगः) च - **'सशङ्खचक्रो हरिः' 'अशङ्खचक्रो हरिः' इति अच्युते** । इन्द्र-यम-वायु-चन्द्र-सूर्य-विष्णु-सिंह-कपीत्यादयः अनेकार्थाः हरिशब्दस्य भवन्ति । किन्तु शङ्खशब्देन सहयोगेन विप्रयोगेण च हरिशब्दः अत्र विष्णुवाचकः भवति । **साहचर्यं विरोधिता च** - यथा - 'रामलक्ष्मणौ', 'रामार्जुनगतिस्तयोः' **"रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे चासिते श्वेते मनोज्ञेऽपि च वाच्यवत् ॥"** रामशब्दः अनेकार्थकः किन्तु लक्ष्मणस्य नाम्नः साहचर्येण दशरथपुत्ररामस्य वाचको भवति । यदि 'रामार्जुनौ' इति प्रयोगः भवति तर्हि परशुरामविरोधित्वेन रामशब्दः 'परशुरामः' इत्यर्थे तथा च अर्जुनशब्दः सहस्रार्जुने

(नर्मदाप्रवाहरोधके कार्तवीर्ये) नियन्त्रितो भवति। **अर्थः** -'स्थाणुं भज भवच्छिदे' इत्यत्र स्थाणुशब्दः शिवार्थे नियन्त्रितो भवति न तु वृक्षषण्डस्तम्भाद्यर्थे । **प्रकरणम्**- 'सर्वं जानाति देवः' इत्यत्र अनेकार्थको देवशब्दः नृपार्थे 'भवान्' इत्यर्थे वा नियन्त्रितो वर्तते। **लिङ्गम्**- 'कुपितो मकरध्वजः' इत्यत्र कोपरूपलिङ्गेन (चिह्नेन) मकरध्वजशब्दः कामदेवे नियन्त्रितः । **अन्यस्य शब्दस्य सन्निधिः**- 'देवस्य पुराराते:' इत्यत्र देवशब्दः पुराराते: सान्निध्यवशात् शम्भौ नियन्त्रितो वर्तते । **सामर्थ्यम्** 'मधुना मत्तः कोकिलः' इत्यत्र कोकिलशब्दसामर्थ्यवशात् मधुशब्दः वसन्ते नियन्त्रितो भवति । **औचित्यम्** -'पातु वो दयितामुखम्' इत्यत्र मुखशब्दस्य औचित्यात् 'साम्मुख्यम्' इत्यर्थे नियन्त्रणं भवति । **देशः** - 'भात्यत्र परमेश्वरः' इत्यत्र राजधानीरूपाद् देशात् परमेश्वरशब्दः 'राजनि' नियन्त्रितः । **कालः** -'चित्रभानुर्विभाति' इत्यत्र चत्रभानुशब्दः दिने सूर्यार्थे रात्रौ च वह्नौ नियन्त्रितो भवति । **व्यक्तिः** -'मित्रं भाति' इत्यत्र लिङ्गकारणात् 'मित्रम्' इति शब्दः 'सुहृद्' इत्यर्थे तथा च 'मित्रो भाति' इत्यत्र 'मित्रः' इति सूर्यार्थे नियन्त्रितः भवति । **स्वरादयः**-'इन्द्रशत्रुः' इत्यादौ वेद एव, न काव्ये स्वरो विशेषप्रतीतिकृत् । एवं संयोगादिभिः अनेकार्थस्य शब्दस्य निवारिते अर्थान्तराभिधायकत्वे नियमनात् तत्र अभिधा न भवति । मुख्यार्थबाधादिहेतूनाम् अभावात् तत्र लक्षणा अपि न भवति। किन्तु व्यञ्जनाव्यापारः एव योग्यतया भवति। यदा शब्दे व्यञ्जना भवति तदा अर्थः, तथैव अर्थे व्यञ्जना भवति तदा शब्दः सहकारी भवति ।

"तद्युक्तो व्यञ्जकः शब्दः यत् सोऽर्थान्तरयुक् तथा ।

अर्थोपि व्यञ्जकस्तत्र सहकारितया मतः ॥"

॥ इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ॥

०००

॥ अथ तृतीय उल्लासः ॥

(आर्थी व्यञ्जना)

पूर्वम् अर्थत्रयस्य प्रतिपादनं मम्मटाचार्येण कृतम्। तत्र लाक्षणिकशब्दप्रसङ्गे प्रयोजनस्य बोधार्थं व्यञ्जनावृत्तेः अनिवार्यतायाः प्रतिपादनं तेन कृतम्। सा व्यञ्जना द्विविधा – शाब्दी व्यञ्जना आर्थी व्यञ्जना च। शाब्दीव्यञ्जनायाः विवेचनं द्वितीयस्मिन् उल्लासे अभवत्। इदानीं तृतीयस्मिन् उल्लासे आर्थीव्यञ्जनायाः विवेचनं क्रियते।

अर्थाः प्रोक्ताः पुरा तेषामर्थव्यञ्जकतोच्यते ।
वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥२१॥
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२२॥

अर्थात् – (१) वक्तृवैशिष्ट्यात् (२) बोद्धव्यवैशिष्ट्यात् (३) काकुवैशिष्ट्यात् (४) वाक्यवैशिष्ट्यात् (५) वाच्यवैशिष्ट्यात् (६) अन्यसन्निधेः वैशिष्ट्यात् (७) प्रस्ताववैशिष्ट्यात् (८) देशवैशिष्ट्यात् (९) कालवैशिष्ट्यात् (१०) चेष्टादिवैशिष्ट्यात् च सहृदयानां (प्रतिभाजुषां रसिकजनानाम्) कृते अन्यार्थप्रतीतिहेतुः यः अर्थात्मकः व्यापारो भवति सा आर्थी व्यञ्जना।

(१) वक्तुः वैशिष्ट्यात् (अन्यार्थप्रतीतिः इति सर्वत्र) –

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ॥

अत्र वक्तुः वैशिष्ट्यात् चौर्यरतगोपनं व्यज्यते॥

(२) बोद्धव्यवैशिष्ट्यात् –

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामपि अहह परिभवति ॥

अत्र बोद्धव्यः सखी वर्तते । तस्याः कामुकोपभोगः व्यज्यते ॥

(३) काकुवैशिष्ट्यात् -

'**काकुर्ध्वनेर्विकारः**' काकुः इत्युक्ते विशेषकण्ठध्वनिः । '**भिन्नकण्ठध्वनिर्धीरैः काकुरित्युच्यते बुधैः**' ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

अत्र भीमसेनः 'गुरुः खेदमपि जानाति' इति उक्त्वा उपर्युक्त-श्लोकं वदति । तत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते ।

(४) वाक्यवैशिष्ट्यात् -

तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यत्र ।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः ॥

अत्र मम सखीं कपोलप्रतिबिम्बितां पश्यतः भवतः दृष्टिः अन्या इव आसीत् । चलितायां तस्यां अन्या एव अभवत् । अतः प्रच्छन्नकामुकत्वं नायिकायाः वाक्यवैशिष्ट्यात् व्यज्यते ॥

(५) वाच्यवैशिष्ट्यात् -

"उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी...." इत्यत्र नर्मदायाः उन्नतप्रदेशरूपस्थानविशेषात् तथा च तस्याः विशेषणीभूत-वायुकुञ्जादिरूपवाच्यात् 'रतार्थं प्रविश' इति व्यज्यते ॥

(६) अन्यसन्निधेः वैशिष्ट्यात् -

नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि सन्ध्यायां भवति न वा भवति विश्रामः ॥

अत्र सन्ध्या सङ्केतकाल इति गुरुजनादेः सन्निधिवैशिष्ट्यात् तटस्थं प्रति कयाचित् द्योत्यते ॥

(७) प्रस्ताववैशिष्ट्यात् -

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम् ॥

उपपतिं प्रत्यभिसर्तुं प्रस्थितां नायिकां प्रति निवारणाय उक्तिरियम्। 'अत्र उपपतिं प्रति अभिसर्तुं प्रस्तुता न युक्तम्' इति व्यज्यते ।

(८) देशवैशिष्ट्यात् -

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरे भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥

सखीवेषधारिणा स्वोपनायकेन सहागतां प्रियसखीं दृष्ट्वा सखीः प्रति नायिकायाः उक्तिः इयम् । अत्र सख्योऽन्यत्र सन्ति । तेन विविक्तो विजनोऽयं देशः । तस्मात् प्रच्छन्नः सखीवेषधारी कामुकः त्वया अत्र प्रेर्यताम् इति प्रियसखीं प्रति देशवैशिष्ट्याद् व्यज्यते ॥

(९) कालवैशिष्ट्यात् -

गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिनी अहम् ।
अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि करणीयम् ॥

प्रवासं गन्तुम् इच्छन्तं नायकं प्रति नायिकायाः उक्तिः । अत्र वसन्तकालवैशिष्ट्यात् "यदि त्वं व्रजसि तदाहं तावत् न भवामि, तव गतिं न जानामि" इति व्यज्यते ॥

(१०) चेष्टादिवैशिष्ट्यात् -

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।
आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने
वाचस्तत्र निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥

स्वगोचरचेष्टाविशेषेण नायिकायाः स्वविषयकभावम् अव्र-धारितवतो नायकस्य सखायं प्रति उक्तिः इयम् । अत्र ऊरुप्रसारादिकया चेष्टया प्रच्छन्नकान्तविषयक आकूत-विशेषः (अभिप्रायविशेषः) ध्वन्यते । शाब्दीव्यञ्जनावत् आर्थीव्यञ्जनायामपि मुख्यवृत्त्या अर्थः व्यञ्जकः भवति । तथापि शब्दस्य सहकारिता भवति ॥

॥ इति काव्यप्रकाशे 'अर्थव्यञ्जकतानिर्णयो' नाम तृतीय उल्लासः ॥

ooo

॥ अथ चतुर्थोल्लासः ॥

'तददोषौ शब्दार्थौ सगुणावनलङ् कृती पुनः क्वापि' इति काव्यलक्षणे 'शब्दार्थौ' इति पदं विशेष्यम्। अवशिष्टानि त्रीणि पदानि विशेषणानि। पूर्वं शब्दार्थयोः विवेचनं कृतम् अनन्तरं च दोष-गुणालङ्काराणां विवेचनं कर्तव्यं भवति। तथापि चतुर्थे उल्लासे काव्यप्रकारवर्णनं किमर्थम्? इति प्रश्ने सति उत्तरमेवमस्ति यत् - दोष-गुणालङ्काराः तु काव्यस्य धर्माः किन्तु काव्यं धर्मी। अतः मम्मटाचार्यः कथयति 'धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह-' काव्यस्य प्रकारत्रयम् - (१) ध्वनिकाव्यम् (२) गुणीभूत-व्यङ्ग्यकाव्यम् (३) चित्रकाव्यम् चेति। ध्वनिकाव्यस्यापि प्रकारद्वयम्- **(१) अविवक्षितवाच्यध्वनिकाव्यम्** (लक्षणामूलध्वनिः) **(२) विवक्षितान्यपरवाच्यध्वनिकाव्यम्** (अभिधामूलध्वनिः) अत्र आनन्दवर्धनाचार्यस्य अनुसरणं दृश्यते - ध्वनिकारः लिखति यत् - *'अस्ति ध्वनिः। स चाविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।'* (ध्वन्यालोकवृत्तिः १/१३)

(१) अविवक्षितवाच्यध्वनिकाव्यम् (लक्षणामूलध्वनिः) -

अविवक्षितवाच्ये वाच्यार्थः अविवक्षितः अर्थात् तात्पर्यस्य विषयो न भवति। अत्र वाच्यार्थस्य बाधः भवति तथा च लक्ष्यार्थबोधेन व्यङ्ग्यार्थस्य प्रतीतिः भवति। अतः अयं लक्षणामूलध्वनिरपि उच्यते। एषः गूढः सहृदयसंवेद्यः च भवति। अत्र व्यङ्ग्यार्थः लक्ष्यार्थापेक्षया अधिकचमत्कारकारकः भवति। **अविवक्षितवाच्यः द्विविधः** (क) अर्थान्तरसङ्क्रमितवाच्यः। (ख) अत्यन्ततिरस्कृतवाच्यः चेति।

अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ।

अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्॥

(क) अर्थान्तरसङ्क्रमितवाच्यः -

यत्र व्यञ्जकत्वेन उपस्थितः वाच्यार्थः प्रकरणेन बाधितो भूत्वा अन्यार्थे

परिणमति तत्र अर्थान्तरसङ्क्रमितः अविवक्षितवाच्यध्वनिः । यथा-

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥

अत्र 'त्वामस्मि वच्मि' इति वाच्यार्थः । 'उपदिशामि' इति लक्ष्यार्थेन 'हितकारिता' इति व्यङ्ग्यार्थस्य बोधः भवति। तेन 'अन्यथाऽऽचरणेन उपहासपात्रं भविष्यति' इति व्यङ्ग्यार्थस्य प्रतीतिः।

(ख) अत्यन्ततिरस्कृतवाच्यः -

यत्र व्यञ्जकत्वेन उपस्थितः वाच्यार्थः प्रकरणेन बाधितः भूत्वा स्वार्थस्य (स्वकीयस्य-अर्थस्य) त्यागं कृत्वा केवलमन्यार्थलक्षको भवति तत्र अत्यन्ततिरस्कृतवाच्यध्वनिः । यथा-

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥


अनेकैः अपकारैः दुःखितस्य कस्यचित् व्यक्तेः उक्तिरियम्। अत्र मुख्यार्थः प्रकरणेन बाधितो भूत्वा स्वार्थत्यागेन अन्यार्थलक्षणो भवति । 'उपकृतम्' शब्दः 'अपकृतम्' इति अर्थस्य बोधकः ।

सुजनतायाः दुर्जनतार्थे, 'सखे' शब्दस्य 'शत्रुः' इत्यर्थे तथा च सुखितस्य दुःखिते अर्थबोधः (विपरीतार्थः) भवति । तेन अपकारस्य अधिकतायाः प्रतीतिर्भवति।

(२) विवक्षितान्यपरवाच्यध्वनिकाव्यम् (अभिधामूलध्वनिः)

यत्र वाच्यार्थः विवक्षितः अर्थात् प्रकरणदृष्ट्या अन्वययोग्यः तथापि रमणीयार्थस्य प्रतीतिं कारयितुं स्वरूपं गौणं कृत्वा व्यङ्ग्यनिष्ठः भवति तत्र विवक्षितान्यपरवाच्यध्वनिः । अत्र अभिधा द्वारा वाच्यार्थबोधो भवति । अनन्तरम् अभिधामूलव्यञ्जनया सहृदयसंवेद्यविलक्षणार्थस्य प्रतीतिः, अतः

अभिधामूलध्वनिरप्युच्यते। विवक्षितान्यपरवाच्यस्य भेदद्वयम् – १. अलक्ष्यक्रमव्यङ्ग्यध्वनिः २. लक्ष्यक्रमव्यङ्ग्यध्वनिः प्रथमे प्रकारे वाच्यार्थव्यङ्ग्यार्थयोः क्रमः न लक्ष्यते। द्वितीयप्रकारे वाच्यार्थव्यङ्ग्यार्थयोः क्रमः लक्ष्यते। रसादिसर्वथाव्यङ्ग्याः, तत्र क्रमः तु भवति किन्तु शीघ्रतया व्यञ्जकव्यङ्ग्ययोः क्रमः न अनुभूयते।



१. अलक्ष्यक्रमव्यङ्ग्यध्वनिः (रसादिध्वनिः)

रसादयः व्यङ्ग्याः भवन्ति। विभावादयः व्यञ्जकाः। तैः विभावाद्यैः रसाभिव्यक्तिः, अतः अत्र वाच्यार्थव्यङ्ग्यार्थमध्यगः क्रमः तु भवत्येव किन्तु न लक्ष्यते। अलक्ष्यक्रमव्यङ्ग्यध्वनेः भेदाः यथा – १. रसः २. भावः ३. रसाभासः ४. भावाभासः ५. भावोदयः ६. भावशान्तिः ७. भावसन्धिः ९. भावशबलता।

रसभावतदाभासभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥

एते रसादयः ध्वनेः आत्मभूताः गुणालङ्कारसौन्दर्यप्रयोजकाः च। अतः रसादीनां यत्र प्रधानतया स्थितिः तत्र ते अलङ्कार्याः। किन्तु यत्र रसादयः वाक्यार्थस्याङ्गभूताः भवन्ति तत्र ते गुणीभूतव्यङ्ग्ये रसवत्-प्रेय-ऊर्जस्वि-समाहितादयोऽलङ्काराः।

॥ मम्मटोक्तरसस्वरूपम् ॥ (रसः)

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥

अत्र आचार्येण मम्मटेन रसस्वरूपस्य वर्णनं कृतम् । रसस्य कारणीभूताः ये विभावादयः सन्ति ते लोकात् विलक्षणाः । रत्यादेः कारणानि काव्ये विभावशब्दात् कार्याणि, अनुभावशब्दात् सहकारीणि च व्यभिचारिशब्दात् व्यवह्रियन्ते । तैः विभावाद्यैः स्थायिभावः रसः स्मृतः । अतः विभावादीनां स्पष्टतां कुर्मः ।

॥ स्थायिभावाः ॥

रसानुभूतेः आन्तरिकं मुख्यं च कारणं स्थायिभावः । स्थायि-भावाः मनसि बीजरूपेण प्रसुप्तसंस्काररूपेण च निहिताः भवन्ति । यदा परिस्थितेः आनुकूल्यं भवति तदा मनसि अन्तःस्थाः स्थायिभावाः प्रकटीभवन्ति । एते स्थायिभावाः चर्व्यमाणाः (रस्यमानाः) भवन्ति तदा रसशब्देन बुद्ध्यन्ते । आहत्य नव स्थायिभावाः सन्ति ।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥

तथा निर्वेदोऽपि स्थायिभावः । एते स्थायिभावाः मनुष्यस्य हृदये सदैव स्थायित्वेन विद्यमानाः वर्तन्ते ।

॥ विभावाः ॥

रसानुभूतेः बाह्यकारणानि विभावाः । ते स्थायिभावं रस्यमानं कुर्वन्ति । सामाजिकस्य हृदये ये स्थायिभावाः सन्ति तान् विभावाः विभावितान् कुर्वन्तः आस्वदयोग्यान् कुर्वन्ति । विभावाः द्विविधाः – (१) आलम्बनविभावाः (२)

उद्दीपनविभावाः चेति। यम् आलम्बनरूपं कृत्वा रत्यादिस्थायिभावा उत्पन्ना भवन्ति स आलम्बनविभावः। यथा सीताम् आलम्बनं कृत्वा रामस्य हृदये रतिः उत्पन्ना भवति तथा च रामं दृष्ट्वा सीतायाः हृदये रतिः उत्पन्ना भवति। उभौ दृष्ट्वा सामाजिकस्य हृदये रतिः उत्पन्ना भवति। अतः सीतारामादयः शृङ्गाररसस्य विभावाः। रात्र्युद्यानैकान्तस्थानादयः उद्दीपनविभावाः ॥

॥ अनुभावाः ॥

हृदयस्थान् स्थायिभावान् बहिः प्रकटीकर्तुं यः शारीरिकः मानसिकः च व्यापारः स अनुभावः। अनुभावाः रसानुभूतेः बाह्या-भिव्यक्तिप्रयोजकाः। साहित्यदर्पणकारेण अनुभावविषये एवमुक्तम् -

"उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥"

॥ व्यभिचारिभावाः ॥

उद्बुद्धस्थायिभावानां पुष्टिं कर्तुम् उपचयं च कर्तुं ये सहकारिणः भवन्ति ते व्यभिचारिभावाः। भरतमुनिना उक्तं यत् - *"विविधम् आभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः। वागङ्गसत्त्वोपेताः प्रयोगे रसान्नयन्तीति व्यभिचारिणः ॥"* अर्थात् रसेषु नानारूपेण विचरणं कुर्वन्तः, रत्यादिनां पुष्टिं कुर्वन्तः तान् आस्वादयोग्यान् कुर्वन्तः ये सन्ति ते व्यभिचारिभावाः। आहत्य ३३ व्यभिचारिभावाः सन्ति। सङ्क्षेपेण -सहृदयानां हृदये रत्यादिस्थायिभावाः वासनारूपेण विद्यमानाः वर्तन्ते। आलम्बनविभावैः तेषां स्थायिभावानाम् आविर्भावः भवति। उद्दीपनविभावैः ते उद्दीप्ता भवन्ति। अनुभावाः तान् स्थायिभावान् प्रतीतियोग्यान् कुर्वन्ति। व्यभिचारिभावैः ते परिपुष्टाः भवन्ति। एवं विभावानुभावव्यभिचारिसंयोगात् व्यञ्जनावृत्तिद्वारा स्थायिभावः अभिव्यक्तः भवति। सः स्थायिभावः 'रसः' कथ्यते ॥

॥ "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति भरतस्य रससूत्रंस्य व्याख्यातारः भट्टलोल्लटादयः सन्ति ॥

१. भट्टलोल्लटस्य रसोत्पत्तिवादः । २. आचार्यशङ्कुकस्य अनुमितिवादः । ३. भट्टनायकस्य भुक्तिवादः । ४. अभिनवगुप्ताचार्यस्य अभिव्यक्तिवादः ।

१. भट्टलोल्लटस्य रसोत्पत्तिवादः –

"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्ष–भुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रसः ॥" इति भट्टलोल्लटप्रभृतयः । ललनादिभिः आलम्बनविभावैः तथा च उद्यानादिभिः उद्दीपनविभावैः रत्यादिस्थायिभावानाम् उत्पत्तिः भवति । कटाक्षादिभिः अनुभावैः रत्यादीनां प्रतीतिः भवति । निर्वेदादिभिः व्यभिचारिभावैः स्थायिभावानां पुष्टिश्च भवति । एवं विभावानुभावव्यभिचारिभावैः मुख्यया वृत्त्या रामादावनुकार्ये रसः प्रतीयते किन्तु तद्रूपतानुसन्धानेन नर्तके (नटे) अपि प्रतीयते । तात्पर्यमेवम् अस्ति यत् –

(१) – 'संयोग' इति पदस्य त्रयः अर्थाः। विभावानां स्थायिभावैः सह 'उत्पाद्योत्पादकभावसम्बन्धः' अनुभावैः सह गम्यगमकभावसम्बन्धः तथा च व्यभिचारिणां स्थायिभावैः सह पोष्य–पोषकभावसम्बन्धः भवति ।

(२) – विभावैः <u>जनितः</u>, अनुभावैः <u>प्रतीतियोग्यः</u> कृतः, तथा च व्यभिचारिभावैः <u>उपचितः</u> स्थायिभावः रसः । अतः 'निष्पत्तिः' इति शब्दस्य त्रयः अर्थाः – जनितः, प्रतीतिः पुष्टिश्च।

(३) रसः मुख्यरूपेण अनुकार्ये रामे तद्रूपानुसन्धाने च नटेऽपि प्रतीयत। किन्तु सामाजिके रसोत्पत्तिः न भवति ।

(४) रसोत्पत्तिवादस्य व्याख्याता भट्टलोल्लटः मीमांसकः पण्डितः आसीत्।

॥ भट्टलोल्लटस्य न्यूनता ॥

१. रसः मुख्यवृत्त्या रामे तथा गौणरूपेण नटे प्रतीयते, किन्तु सामाजिकरसानुभूतेः कृते किमपि न उक्तम् ।

२. अनुकार्यरामसीतादयः तु अनुपस्थिताः अतः एतस्मिन् समये कृताभिनयेऽपि तेषु रसोत्पत्तिः कथं सम्भवति ? अतः अनुकर्तरि नटेऽपि रसोत्पत्तिः न शक्यते ॥

२. आचार्यशङ्कुकस्य अनुमितिवादः –

भरतसूत्रस्य द्वितीयः व्याख्याता आचार्यः शङ्कुकः । सः नैयायिकः । तस्य रससिद्धान्तः अनुमितिवादः । "राम एवायम् अयमेव ..चर्व्यमाणो रस इति श्रीशङ्कुकः ।" अनुमितिवादस्य विश्लेषणम् एवं वर्तते यत् –

१. जगति प्रतीतिचतुष्टयम् (१) सम्यक् (२) मिथ्या (३) संशयः (४) सादृश्यम् इति । – राम एवायम् अयमेव राम इति सम्यक्प्रतीतिः । – न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति मिथ्याप्रतीतिः। – रामः स्यात् वा न वाऽयमिति संशयप्रतीतिः । – रामसदृशोऽयमिति सादृश्यप्रतीतिः । एताभ्यः प्रतीतिभ्यः विलक्षणतया चित्रतुरगादिन्यायेन 'रामः अयम्' इति ज्ञानं भवति । तथैव नटे रामबुद्धिः भवति । शङ्कुकानुसारं नटे अनुमीयमानः रसः ।

२. अत्र कृत्रिमरामसीतादिविभावानां प्रतीतिः चित्रतुरगन्यायेन भवति । नटे स्मितकटाक्षादयः अनुभावा अपि कृत्रिमाः । किन्तु नटः काव्यानुसन्धानबलेन शिक्षाभ्यासेन च स्मितकटाक्षादीन् प्रदर्शयति । एवं कृत्रिमविभावानुभावद्वारा अनुमीयमानः रसः प्रतीयते । अतः संयोगशब्दस्य अर्थः – 'गम्यगमकभावसम्बन्धः' इति । अत्र कृत्रिमरामसीतादिगतस्य रसस्य सामाजिकः केवलम् अनुमानं करोति ।

३. सामान्यतः अनुमानादिप्रमाणेन यत् ज्ञानं भवति तत् परोक्षज्ञानम् । केवलप्रत्यक्षप्रमाणेन 'अपरोक्षा' प्रतीतिः सम्भवति । किन्तु एषा रसानुमितिः विलक्षणतया 'अपरोक्षा' विद्यते । तया अनुमित्या सामाजिकः रसास्वादं करोति ।

४. वस्तुतः रसः न सामाजिके तथा च न कृत्रिमनटे विद्यते परन्तु वासनया सामाजिके चर्व्यमाणः भवति ।

॥ आचार्यशङ्कुकस्य न्यूनता ॥

– सामाजिकस्य रसानुभूतेः समस्यायाः समाधानं शङ्कुकेन न दत्तम्। – रसानुभूतिः तु साक्षात्कारात्मिका। साक्षात्कारात्मिकायाः प्रतीतेः उपादानम् अनुमित्या कर्तुं न शक्यते। अनुमानेन कृतं ज्ञानं परोक्षं भवति साक्षात्कृतं न भवति। अनुमितिवादस्य एषः दोषः ॥

३. भट्टनायकस्य भुक्तिवादः –

"न ताटस्थ्येन नात्मकतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी, सत्त्वोद्रेकप्रकाशानन्दमय-संविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते।" इति भट्टनायकः।

१. भरतस्य रससूत्रस्य तृतीयः व्याख्याकारः भट्टनायकः। तत्र प्रथमभागे अन्येषां मतानुसारं रसानुभूतिः सामाजिके भवति, अतः अनुकार्यः रामः तथा च अनुकर्ता नटः इति तौ उभौ तटस्थौ। ताटस्थ्येन रसः न प्रतीयते, न उत्पद्यते। तथैव रसस्य अभिव्यक्तिरपि न भवति, यतः यः पूर्वसिद्धः वर्तते तस्य एव अभिव्यक्तिः भवति, रसः पूर्वसिद्धः अपि नास्ति।

२. भट्टनायकस्य मते शब्दस्य शक्तित्रयम् – अभिधाव्यापारः भावकत्वव्यापारः भोजकत्वव्यापारश्च। अभिधया लक्षणया वा काव्यस्य उपस्थितार्थः शब्दस्य भावकत्वव्यापारेण सामाजिकाय उपभोगयोग्यः भवति। अभिधया उपस्थितः अर्थः व्यक्तिविशेषसम्बद्धः वर्तते। भावकत्वव्यापारेण तत्रत्यव्यक्तिविशेषसम्बन्धः दूरीभवति। अनन्तरं विभावादीनां साधारणीकरणं भवति। भावकत्वव्यापारेण साधारणीकरणेन सामाजिकः स्वयं कथायाः पात्रं भवति। यद् स्थानं नायकनायिकादीनां तत् स्थानं प्रायः सामाजिकः प्राप्नोति।

३. साधारणीकृतः स्थायिभावः सत्त्वोद्रेकप्रकाशानन्दमयेन संविद्विश्रान्तिसतत्त्वेन भोजकत्वव्यापारेण भुज्यते। एवं भोजकत्व-व्यापारेण रसस्य साक्षात्कारः भवति।

४. एतस्मिन् मते संयोग: इत्युक्ते भोज्यभोजकसम्बन्धः तथा च निष्पत्तिः अर्थात् भुक्तिः । भट्टनायकः साङ्ख्याचार्यः ॥

॥ भुक्तिवादस्य न्यूनता ॥

– भट्टनायकेन सामाजिकगतरसानुभूतेः सम्यक् प्रतिपादनं कृतम्। किन्तु तस्यां प्रक्रियायां भावकत्वस्य भोजकत्वस्य च नूतनयोः व्यापारयोः कल्पना कृता। तौ व्यापारौ न अनुभवसिद्धौ न च प्रसिद्धौ।

– पुनः तेन स्थायिभावस्य भोगः दर्शितः। सः स्थायिभावः रामसीतादिगतः नटगतः सामाजिकगतः वा इत्यस्य स्पष्टीकरणं न कृतम्। अतः भुक्तिवादः विद्वत्सु आदरं न प्राप्तवान्।

४. अभिनवगुप्ताचार्यस्य अभिव्यक्तिवादः –

भरतरससूत्रस्य चतुर्थः किन्तु सर्वप्रमुखः व्याख्याकारः अभिनवगुप्ताचार्यः। आचार्यः मम्मटः तस्य मतं स्वीकृतवान्। एतदनुसारं विभावादीनां स्थायिभावेन सह व्यङ्ग्यव्यञ्जकभावसंयोगात् रसस्याभि-व्यक्तिः भवति । अतः संयोगः अर्थात् व्यङ्ग्यव्यञ्जकभावसम्बन्धः । तथा च निष्पत्तिः अर्थात् अभिव्यक्तिः । एषः एव साहित्यशास्त्रस्य सिद्धान्तः । *"लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां .... अलौकिकचमत्कारकारी शृङ्गारादिको रसः ॥"*

१. सामाजिकस्य पात्रता –

'लोके सामाजिकानां वासनात्मतया स्थितः स्थायी'। सामाजिकः अर्थात् भावः कीदृशः भवेत् इति प्रश्ने सति सः स्थायिभावस्य कारणकार्यसहकारिभिः अनुमानं कर्तुं पटुः कुशलः च भवेत्। द्वितीयं सः सहृदयः भवेत्। यः सहृदयः अर्थात् रसानुभूति-वासनायुक्तः भवति सः रसास्वादं कर्तुं शक्नोति। अतः एव उक्तम् –

सवासनानां नाट्यादौ रसस्यानुभवो भवेत् ।
निर्वासनास्तु रङ्गान्तर्वेश्मकुड्याश्मसन्निभाः ॥

२. विभावादीनां कार्याणि –

'काव्ये नाट्ये च तैरेव अलौकिकविभावादिशब्दव्यवहार्यैः साधारण्येन प्रतीतैः अभिव्यक्तः ।' काव्ये नाट्ये च प्रमदादिद्वारा रत्यादिस्थायिभावाः अभव्यक्ताः भवन्ति । एतेषां रत्यादिस्थायिभावानां कारणकार्यसहकारीणि तत्त्वानि काव्ये क्रमात् 'विभावानुभावव्यभिचारिणः' इति शब्दैः व्यवह्रियन्ते । काव्यस्य अलौकिकाभिव्यञ्जनाशक्तिद्वारा विभावादीनां साधारणीकरणं भवति । अतः "ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते, न ममैवैते, न तटस्थस्य एवैते" इति सम्बन्धविशेषस्य अनुभवः दूरीभवति । सम्बन्धविशेषस्य स्वीकृतिपरिहारस्य निश्चयः न जायते । स्वकीयत्वस्य परकीयत्वस्य उपेक्षणीयत्वस्य च काव्ये नाट्ये च स्वीकृतिः निवृत्तिश्च न भवति ।

३. विभावादीनां प्रतीतिः साधारण्येन - 'नियत.......प्रमात्रा गोचरीकृत०'

विभावादयः रत्यादेः अभिव्यक्त्युपायाः । काव्ये नाट्य च तेषां विभावादीनां साधारणीकरणं भवति । अतः रसास्वादसमये प्रमाता अपरिमितः भवति । तेन तस्य हृदये विशेषा चित्तवृत्तिः उदेति । सम्पर्कशून्यापरिमितभावेन रत्यादिस्थायिभावानामपि साधारणीकरणं भवति । एतस्य साधारणीकरणस्य अनुभवं सर्वे सामाजिकाः कुर्वन्ति । (सकलहृदयसंवादभाजा) ।

४. चर्वणा एव रसस्य प्राणः - 'स्वाकार इव .... चर्व्यमाणः०'

रसः स्वतन्त्रपदार्थवत् भासते किन्तु काव्यस्य रसः आम्ररसवत् स्वतन्त्रपदार्थः नास्ति । यथा ज्ञानं तथा च तस्य विषयः अभिन्नः तथा रसः एव चर्वणा । चर्वणा एव रसस्य प्राणः (चर्व्यमाणतैकप्राणः) । यदा चर्वणा आरभ्यते तदा रसानुभूतिः । चर्वणायाः समाप्तिः चेत् रसानुभूतेः अपि समाप्तिः । विभावादिजीवितावधि रसचर्वणा । पानकरसन्यायेन रसचर्वणा ।

५. रसास्वादस्वरूपम् -

'पुर इव शृङ्गारादिको रसः....' रसानुभूतिसमये रसः पुरः इव परिस्फुरन्, हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधत् भवति । तस्य अनुभवः ब्रह्मास्वादवत् भवति । विगलितवेद्यान्तरः अलौकिकचमत्कारकारी रसः ।

अभिनवगुप्तानुसारं रससूत्रस्यार्थः – "स्थायिनां विभावादिभिः व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात् रसस्य अभिव्यक्तिः (निष्पत्तिः)"।

॥ रसस्य अलौकिकता ॥

१. रसः न कार्यः नापि च ज्ञाप्यः ।

२. रसः कार्यः च ज्ञाप्योऽपि ।

३. रसः न निर्विकल्पकः न च सविकल्पकः ।

४. रसः उभयात्मकः (सविकल्पकः निर्विकल्पकश्च)

१. रसः न कार्यः नापि च ज्ञाप्यः –

"स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्यः, सिद्धस्य तस्यासम्भवातष्ट। अपि तु विभावादिभिर्व्यञ्जितः चर्वणीयः।" कारणनाशेऽपि कार्यः भवति । यथा – कुम्भकारः कारकः,(कारणम्) घटः तु कार्यः(कार्यम्) । कुम्भकारस्य विनाशेऽपि कार्यः घटः भवति। रसस्य विषये तु विभावादिनाशे रसस्यापि नाशः। विभावादिजीवितावधि रसः, अतः रसः न कार्यः। अन्धकारे स्थितः घटः न दृश्यते, किन्तु यदि दीपं प्रज्वालयामः चेत् घटः दृशोः विषयतां प्राप्नोति। अत्र घटः ज्ञाप्यः दीपकः च ज्ञापकः। ज्ञाप्यपदार्थः पूर्वसिद्धः विद्यते। किन्तु रसः पूर्वसिद्धः न भवति, अतः न ज्ञाप्यः । तर्हि कारकज्ञापकाभ्याम् अन्यत् किमपि दृष्टम् ? तर्हि उत्तरम् अस्ति यत् – तत् भूषणं न तु दूषणम्। अतः एव रसः अलौकिकः ।

२. रसः कार्यः च ज्ञाप्योऽपि –

चर्वणया रसस्य निष्पत्तिः अतः उपचारेण रसः कार्यः। लौकिकप्रत्यक्षज्ञानं त्रिविधम् प्रत्यक्षं मितयोगिज्ञानं परिमितेतरयोगिज्ञानं ज्ञानं च। (१) 'प्रत्यक्षादि' (२) प्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानम् । (३) वेद्यान्तरस्पर्शरहितस्वात्म-मात्रपर्यवसितपरिमितेतरयोगिसंवेदनम्। एतेभ्यः ज्ञानेभ्यः विलक्षणतया रसस्य प्रतीतिः भवति। अतः रसः ज्ञाप्यः अलौकिकश्च ।

३. रसः न निर्विकल्पकः न च सविकल्पकः -

नामजात्यादियोजनासहितं ज्ञानं सविकल्पकम् ।

नामजात्यादियोजनारहितं ज्ञानं निर्विकल्पकम् ।

रसग्रहणं न सविकल्पकेन न च निर्विकल्पकेन भवति। नाम-जात्यादिरहितं ज्ञानं निर्विकल्पकम्। अतः बालकस्य ज्ञानं निर्विकल्पकम्। निर्विपल्पके विभावादीनां प्रतीतिः न भवति। किन्तु रसानुभूतिमध्ये तु विभावादीनां प्रतीतिः भवति। अतः रसः निर्विकल्पकज्ञानस्य विषयोऽपि नास्ति । सविकल्पकं तु नाम-जात्यादिसहितम् । यथा - घटः पटः । सविकल्पकज्ञानस्य विषयः शब्दव्यवहाररूपः वर्तते । परन्तु रसानुभूतिः स्वसंवेदनसिद्धा चर्व्यमाणा च वर्तते । अतः रसः सविकल्पकेनापि अग्राहकः ।

४. रसः उभयात्मकः (सविकल्पकः निर्विकल्पकश्च) -

रसस्य ज्ञानं न निर्विकल्पकं न च सविकल्पकम् । तस्य तात्पर्यं सः निर्विकल्पकः सविकल्पकश्चेति उभयात्मकः। यतः यत् निर्विकल्पकं न स्यात् तत् सविकल्पकम्। तथा च यत् सविकल्पकं न स्यात् तत् निर्विकल्पकम्। तर्हि एतत् उभयात्मकं दोषरूपं किम् ? इति प्रश्ने सति पूर्ववत् न दूषणम् अपि तु भूषणम्।

ooo

॥ रसभेदाः ॥

श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुत संज्ञौ चेत्यष्टौ नाट्ये रसा स्मृताः ॥

तथा - निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ॥ अतः नाट्ये अष्टावेव रसाः, काव्ये पुनः शान्तेन सह ते नव रसाः भवन्ति। इति चिन्तयितुं शक्नुमः। नाट्ये हि अवस्थाऽनुगुणे सर्वविषयोपरमस्वरूपस्य शान्तस्य नास्ति सम्भवः।

अवस्थानुकृतिर्नाट्यम् - धनञ्जयः। रोमाञ्चादि विरहेणाऽभिनेयत्वात्, गीतवाद्यादेस्तद्विरोधित्वाच्च। एतेनाऽभिलाषस्थायिको लौल्यरसः, श्रद्धास्थायिको भक्तिरसः, स्पृहास्थायिकः कार्पण्याख्याऽतिरिक्तो रसोऽस्तीत्यपास्तम्। त्रयाणामपि भावाऽन्तर्गतत्वात्। जगन्नाथः अपि वदति यत् - अथ कथमेते एव रसाः? उक्तं च - रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः।

॥ भावभेदाः ॥

भावस्य प्रकारद्वयम् - स्थायिभावः व्यभिचारी च। ये स्थिरत्वं प्राप्तुं शक्नुवन्ति ते स्थिरभावाः स्थायिभावाः। यै उद्भूय क्षणान्तरं विरम्यते ते व्यभिचारिभावाः। तेषां संख्या ३३ अस्ति। विश्वनाथेन वात्सल्यभावस्य प्रतिष्ठा कृता रूपगोस्वामिना भक्तिरसस्य प्रतिष्ठा कृता। भक्तिरसस्य स्थायिभावः रतिरस्ति।

व्यभिचारिभावाः (१) निर्वेदः (२) ग्लानिः (३) शङ्का (४) श्रमः (५) धृतिः (६) जाड्यम् (७) हर्षः (८) दैन्यम् (९) उग्रता (१०) चिन्ता (११) त्रासः (१२) ईर्ष्या (१३) अमर्षः (१४) गर्वः (१५) स्मृतिः (१६) मरणम् (१७) मदः (१८) सुप्तिः (१९) निद्रा (२०) विबोधः (२१) क्रीडा (२२) अपलापः (२३) मोहः (२४) मतिः (२५) आलस्यम् (२६) आवेगः (२७) वितर्कः (२८) अवहित्था (२९) व्याधिः (३०) उन्मादः (३१) विषादः (३२) औत्सुक्यम् (३३) चापल्यम्

	स्थायिभावः	**रसः**	**वर्णः**	**देवता**
१,	रतिः	शृङ्गारः	श्यामः	विष्णुः
२,	हासः	हास्यः	श्वेतः	प्रमथः
३,	शोकः	करुणः	कपोतः	यमः
४,	क्रोधः	रौद्रः	रक्तः	रुद्रः
५,	उत्साहः	वीरः	हैमः	महेन्द्रः

६,	भयम्	भयानकः	कृष्णः	भूतः
७,	जुगुप्सा	बीभत्सः	नीलः	महाकालः
८,	विस्मयः	अद्भुतः	पीतः	गन्धर्वः
९,	शमः	शान्तः	इन्दुवर्णः	नारायणः

१. **शृङ्गारः**

शृङ्गाररस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च। तत्र सम्भोगः परस्परावलोकनालिङ्गनाधरपानचुम्बनादनतत्वाद् अपरिछेद्य एक एव गण्यते। स एव सम्भोगः नायिकारब्धो नायकारब्धश्चेतिद्विधा। तत्र नायिकारब्धो यथा

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
-र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य-पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

अत्र नायक आलम्बनम्। शून्यगृहनायकनिद्रादि उद्दीपनम्। मुखनिर्वर्णनचुम्बनादि अनुभावः। लज्जा - हास- व्यङ्ग्यहर्षादि व्यभिचारिभावः। रतिः स्थायिभावः। सामाजिके नायिकानिष्ठस्यैव रसस्य निष्पत्तिः। **नायकारब्धो यथा**

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥ इति

अत्रमुग्धाक्षी आलम्बनम्। नयनसौन्दर्याङ्गशोभादि उद्दीपनम् ।आभाषणवीटिकास्पर्शौ अनुभवौ। उत्कण्ठादयो व्यभिचारिणः। सामाजिके नायकनिष्ठरतिविषयकरसनिष्पत्तिरिति दिक्। **विप्रलम्भस्तु पञ्चविधः**

(१) अभिलाषहैतुकः (२) विरहहैतुकः (३) ईर्ष्याहैतुकः (४) प्रवासहैतुक
: (५) शापहैतुकः

(१) अभिलाषहैतुकः

अप्राप्तसमागमयोः परस्परप्राप्तीच्छा अभिलाषः यथा

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥

अत्र मालती आलम्बनम् । तडिद्विलासाऽनुस्मरणम् उद्दीपनम् । आशंसाऽनुभावः । यद्व्यङ्ग्योत्कण्ठा व्यभिचारिभावः । रतिः स्थायिभावः सामाजिके नायिकानिष्ठरतिविषयकरसनिष्पत्तिः ।

(२) विरहहैतुकः

एकदेशस्थितयोरपि एकतरस्याननुरागाद् गुरुलज्जादिवशाच्चासंयोगः । यथा- 'अन्यत्र व्रजतीति--०' इत्यत्र अनागतपतिरालम्बनम् । अनागमनादिरुद्दीपनम् । विवर्तनादिरनुभावः । इत्यादिसूचितो दैन्यं वा व्यभिचारिभावः । रतिः स्थायिभावः । अत्र सामाजिके नायिकानिष्ठरतिविषयकरसनिष्पत्तिः।

(३) ईर्ष्याहैतुकः

मानहेतुमात्रम् । यथा- 'सा पत्युः प्रथमापराधसमये--०' इत्यत्र पतिरालम्बनम् । अपराध उद्दीपनम् । रोदनाद्यनुभावः । तद्व्यङ्ग्या असूया व्यभिचारिभावः । रतिः स्थायिभावः । सामाजिके नायिकानिष्ठरतिविषयक-रसनिष्पत्तिः ।

(४) प्रवासहैतुकः

अनुरक्तयोरपि कार्यान्तरवशाद् विभिन्नदेशस्थितिः । 'प्रस्थानं वलयैः कृतं

--- ०' इत्यत्र प्रियतमालम्बनम्। तत्प्रयाणादि उद्दीपनम्। कार्श्यादयोऽनुभावाः। तद्व्यङ्ग्या चिन्ता व्यभिचारिभावः। रति स्थायिभावः। अत्र सामाजिके नायिकानिष्ठरतिविषयकरसनिष्पत्तिः।

(५) शाप हैतुकः

एतावन्तं कालं तव नायिकासंयोगो माऽस्तु इत्यादिरूपः। यथा- 'त्वामालिख्य -- ०' इत्यत्र नायिका आलम्बनम्। तत्प्रणयकोप उद्दीपनम्। चरणपातेच्छादिः अनुभावः। कृतान्ते असूया व्यभिचारिणः। रतिः स्थायिभावः। सामाजिके नायिकानिष्ठरतिविषयकरसनिष्पत्तिः।

२ हास्यः

रागादिवैकृतैश्चेतोविकासो हास इष्यते। (सा. द.) हासस्थायिभावको विकृतकृतालम्बनको वैकृताद्युद्दीपितो, गल्लफुल्लाद्यभावितः, श्रमादिसञ्चारितो हास्यः। यथा

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्यामन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।
तारस्वनं प्रथितथूत्कमदात्प्रहारं हा हा हतोऽहमिति रोदिति विष्णुशर्मा॥

अत्र विष्णुशर्मा आलम्बनम्। रोदनम् उद्दीपनम्। स्मितातिहसितरुदितादयउत्तममध्यमाधमेष्वनुभावः। द्रष्टुरावेगचापल्यादयो व्यभिचारिणः। हासः स्थायिभावः। तेन हासप्रकृतिको रसः सामाजिकेषु व्यज्यते।

३ करुणः

इष्टनाशादिश्चेतोवैकल्यं शोकशब्दभाक्। (सा.द.) शोकस्थायिभावको मृतालम्बनकः, तद्गुणोद्दीपितः, रोदनाद्यनुभावितो दहन्यादिसञ्चारितः करुणो रसः। यथा

'हा मातस्त्वरितासि कुत्र किमदं हा देवताः क्वाशिषः

धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।

इत्थं घर्घरमध्यसद्धकरुणाः पौराङ्गनानां गिर–
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥'

अत्र मृतनायिका आलम्बनम् । तद्दाहाद्युद्दीपनम् । रोदनमनुभावः । दैन्यग्लानिमूर्च्छादयो व्यभिचारिणः । शोकः स्थायिभावः । अत्र सामाजिके शोकप्रकृतिकः करुणरसो व्यज्यते ।

४ रौद्रः

प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते । (सा.द.) क्रोधस्थायिभावको द्विषदालम्बनकस्तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसञ्चारितो रौद्रः । यथा

'कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं–
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना–
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥

अत्र अपकारिणोऽर्जुनादय आलम्बनम् । पितृहन्तृत्वमस्त्राद्युद्यमनम् उद्दीपनम् । प्रतिज्ञानुभावः । अन्यनैरपेक्ष्यगम्यगर्वो व्यभिचारिभावः । क्रोधः स्थायिभावः । तैः सामाजिके क्रोधप्रकृतिको रौद्रो रसो व्यज्यते ।

५ वीरः

'कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।' (सा.द.) उत्साहस्थायिभावको द्विपद्विपदञ्जादीनालम्बन कोऽपकारगुणापदुद्दीपितः प्रतिकारकरणदानाद्यनुभावितो हर्षावेगचिन्तादिसञ्चारितो वीरः । यथा–

'क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥'

अत्र शवः प्रेतरङ्को वा आलम्बनम् । तत्कर्तनं मांसादनं चोद्दीपनम् । तद्द्रष्टुर्नासावदनविधूननविवर्तननिष्ठीवनादयोऽनुभावाः । उद्वेगादयो व्यभिचारिभावा । जुगुप्सा स्थायिभावः । सामाजिके जुगुप्साप्रकृतिको बीभत्सो रसो व्यज्यते ।

८ अद्भुतः

'विविधेषु पदार्थेषु लोकसीमातिवर्तिषु विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः' (सा.द.) विस्मयस्थायिभावको विस्मयजनककर्मकर्त्रालम्बनको विस्मयतर्काद्युद्दीपितश्चकितताद्यनुभावितो हर्षादिसञ्चारितोऽद्भुतः । यथा-

'चित्रं महानेष बतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ॥

अत्र वामन आलम्बनम् । कान्तिगुणातिशयादि उद्दीपनम् । स्तवादयोऽनुभावाः । मतिधृतिहर्षादयो व्यभिचारिणः । विस्मयः स्थायिभावः । सामाजिके विस्मयप्रकृतिकोऽद्भुतो रसो व्यज्यते ।

९ शान्त :

'शमो निरीहावस्थायामात्मविश्रामजं सुखम्' (सा.द.) निर्वेदस्थायिभावको मिथ्यात्वप्रतीयमानजगदालम्बनकः तपोवनाद्युद्दीपितः, अहिहारादिसमदर्शनानुभावितो मतिधृतिहर्षादिसञ्चारितः शान्तः । अतः मम्मटाचार्येण उक्तम्- 'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।' यथा

'अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्यारण्ये शिव-शिव-शिवेति प्रलपतः ॥

अत्र मिथ्यात्वेन परिभाव्यमानं जगद् आलम्बनम् । तपोवनमुद्दीपनम् ।अहि-

अत्र रामआलम्बनम्। तत्समुद्रबन्धनम् उद्दीपनम्। क्षुद्रेषूपेक्षा पराक्रमशालिनि रामे प्रतिस्पर्धा चाऽनुभावौ। ऐरावतकुम्भस्थलचूर्णनस्मृतिः, लज्जां दधतीति गम्यगर्वश्च व्यभिचारिणौ। उत्साहः स्थायिभावः। सामाजिके उत्साहप्रकृतिको वीरो रसो व्यज्यते।

६ भयानकः

'रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्।' भयस्थायिभावको विकटाद्यालम्बनकः तद्विकटकर्माद्युद्दीपितः पलायनाद्यनुभावितो जडतादिसञ्चारितो भयानकः। यथा-

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

अत्र पश्चाद् गच्छत्स्यन्दनो राजा वा आलम्बनम्। शरपतनभयमनुसरणं चोद्दीपनम्। ग्रीवाभङ्गपलायनादयोऽनुभावाः। शङ्कात्रासश्रमादयो व्यभिचारिणः। भयं स्थायिभावः। सामाजिके भयप्रकृतिको भयानको रसो व्यज्यते।

७ बीभत्सः

'दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा' (सा.द.) जुगुप्सास्थायि- भावको विण्मूत्राद्यालम्बनको दुर्गन्धाद्युद्दीपितो निष्ठीवनाद्यनुभावितो ग्लान्यादिसञ्चारितो बीभत्सः। यथा -

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा -
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।
आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्काद।
ङ्कस्थादस्थिसंस्थं स्वपुटगतमपि क्रव्यमव्यग्रमत्ति॥

मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुर: ।
नो यावत् परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृत: ॥

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन । मुख्ये रसे विद्यमाने सति कदाचन केचन भावा: अङ्गित्वं प्राप्नुवन्ति । तदा ते रसवदादय: अलङ्कारा: ।

संलक्ष्यक्रमव्यङ्ग्य–ध्वने: भेदा:

संलक्ष्यक्रमव्यङ्ग्य -ध्वने: त्रय: प्रकारा: ।

संलक्ष्यक्रमव्यङ्ग्य:

शब्दशत्युद्भवध्वनि: अर्थशक्त्युद्भवध्वनि: उभयशक्त्युद्भवध्वनि:

(१) यत्र प्रधानतया शब्दशक्तिद्वारा वस्तु अलङ्कार: च व्यज्येते स: शब्दशक्त्युद्भवध्वनि: । तत्र शब्दशक्तिमूलाऽनुरणनरूपव्यङ्ग्यो द्विधा । अलङ्कारध्वनि: वस्तुध्वनिश्च ।

'अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ।
प्रधानत्वेन स ज्ञेय: शब्दशक्त्युद्भवो द्विधा ॥ '

- तत्रालङ्कारध्वनिर्यथा - **'उल्लास्य कालकरवालमहाम्बुवाहं................ । '**,

- शब्दशक्तिमूलको वस्तुध्वनिर्यथा - **'पथिक ! नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे । उन्नतपयोधरं प्रेक्ष्य यदि वससि तद् वस ॥**

(२) **अर्थशक्तिमूलध्वने: द्वादशभेदा: भवन्ति ।**

१. स्वत: सम्भविना वस्तुना वस्तुध्वनि: ।

२. स्वत: सम्भविना वस्तुना अलङ्कारध्वनि: ।

हाराद्यो: समदर्शनमनुभाव: । मति-धृतिहर्षा व्यभिचारिभावा: । निर्वेद: स्थायिभाव: । सामाजिके शान्तरसनिष्पत्ति: ।

भावस्य लक्षणम्

मम्मटेन उक्तम् यत् - **रतिर्देवादिविषया व्यभिचारी तथाऽञ्जित: । भाव:प्रोक्त: ।** देव-मुनि-गुरु-नृप-पुत्रादिविषया सर्वप्रकारा कान्तादिविषयापि अपुष्टा रति: । तथा च प्राधान्येन अभिव्यक्त: व्यभिचारिभाव: प्रोक्त: - देवविषया रतिर्यथा -

'कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥

इत्यत्र महादेव आलम्बनम् । ईशपदप्रतिपाद्याऽव्याहतैश्वर्यम् उद्दीपनम् । स्तवोऽनुभाव: । धृतिमाहात्म्यस्मरणादयो व्यभिचारिण: । अत्रैतैरनुमितस्तावकरतीनां सामाजिकानां तैरेव विभावादिभिर्व्यञ्जिता रतिर्भाव एवेति बोध्यम् । चाऽस्या रसत्वम् । मुनिविषया रतिर्यथा -

'हरत्यघं सम्प्रति हेतुरेष्यत: शुभस्य पूर्वाचरितै: कृतं शुभै: ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥

इत्यत्र मुनिविषयक श्रीकृष्णरतेर्मुनिरालम्बनम् । दर्शनयोग्यताव्यञ्जनम् उद्दीपनम् । श्रीकृष्णस्येयम् उक्तिरेव अनुभाव: । तद्व्यङ्ग्यो हर्षश्च व्यभिचारी । कान्ताविषयाऽपुष्टा रतिर्यथा -

'हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशि: ।
उमामुखे बिम्बफलाऽधरोष्ठे व्यापारयामास विलोचनानि ॥

प्राधान्येन वर्णितो व्यभिचारी यथा -

'जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया

॥ काव्यप्रकाशाचमनम् ॥

- व्यङ्ग्यध्वनिः
  - अविवक्षितवाच्यध्वनिः
    - अर्थान्तरसंक्रमितवाच्यध्वनिः
    - अत्यन्ततिरस्कृतवाच्यध्वनिः
  - विवक्षितान्यपरवाच्यध्वनिः
    - असंलक्ष्यक्रमव्यङ्ग्यध्वनिः
      - १. रसः
      - २. भावः
      - ३. रसाभासः
      - ४. भावाभासः
      - ५. भावशान्तिः
      - ६. भावोदयः
      - ७. भावसन्धिः
      - ८. भावशबलता इत्यादयः
        - पदैकदेशरचना-वर्णप्रबन्धगतः (आहत्य ४ भेदाः)
    - संलक्ष्यक्रमव्यङ्ग्यध्वनिः
      - शब्दशक्त्युत्थध्वनिः
        - वस्तुध्वनिः
        - अलङ्कारध्वनिः
          - १. पदगतध्वनिः
          - २. वाक्यगतध्वनिः
          - (२ × २ = ४ भेदाः)
      - अर्थशक्त्युत्थध्वनिः
        - स्वतःसम्भवी
        - कविप्रौढोक्तिसिद्धः
        - कविनिबद्धवक्तृ-प्रौढोक्तिसिद्धः
          - १. वस्तुना वस्तुध्वनिः
          - २. वस्तुना अलङ्कारध्वनिः
          - ३. अलङ्कारेण वस्तुध्वनिः
          - ४. अलङ्कारेण अलङ्कारध्वनिः
          - (४ × ३ = १२ भेदाः)
          - पद-वाक्य-प्रबन्धगतध्वनिः
          - (१२ × ३ = ३६ भेदाः)
      - उभयशक्त्युत्थध्वनिः

एवं शुद्धभेदानां परस्परं एकपञ्चाशतां योगेन (५१ × ५१) २६०१ भेदाः
भवन्ति । अत्र त्रिविधेन सङ्करेण एकरूपया संसृष्ट्या च सह योगेन (२६०१ × ४) =
१०४०४ भेदाः । शुद्धाः एकपञ्चाशद्भेदाः सह मिलित्वा १०४५५ भेदाः ध्वनेः भवन्ति ।

३. स्वतः सम्भविना अलङ्कारेण वस्तुध्वनिः ।

४. स्वतः सम्भविना अलङ्कारेण अलङ्कारध्वनिः ।

५. कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनिः ।

६. कविप्रौढोक्तिसिद्धवस्तुना अलङ्कारध्वनिः ।

७. कविप्रौढोक्तिसिद्धालङ्कारेण वस्तुध्वनिः ।

८. कविप्रौढोक्तिसिद्धालङ्कारेण अलङ्कारध्वनिः ।

९. कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनिः ।

१०. कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुना अलङ्कारध्वनिः ।

११. कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारेण वस्तुध्वनिः ।

१२. कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारेण अलङ्कारध्वनिः ।

उभयशक्त्युत्थ एकविधः ।

इत्थं ध्वनः अष्टादशभेदाः जाताः । अयं च ध्वनिः उभयशक्त्युत्थं विहाय पदवाक्यगतत्वेनः द्विविधः, इति मिलित्वा पञ्चत्रिंशद् भेदा जायन्ते । अर्थशक्त्युत्थः प्रबन्धेऽपि भवति, इति पञ्चत्रिंशद्ध्वनिषु द्वाद्वशभेदान् सम्मिल्य सप्तचत्वारिंशद् भेदाः भवन्ति । असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिः पदैकदेशरचनावर्णबन्धगतोऽपि भवतीति पूर्वोक्तभेदेषु इमान् चतुरो भेदान् सम्मेल्य ध्वनेः एकपञ्चाशद् भेदाः जायन्ते । एते ध्वनेः शुद्धभेदाः ।

कविराजः विश्वनाथोऽपि मम्मटा-चार्यम् अनुसरति यत् -

तत्र स्यादितराङ्गं काक्वाक्षिप्तं च वाच्यसिद्ध्यङ्गम् ।
सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् ।
व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ॥

१. अगूढगुणीभूतव्यङ्ग्यम् -

असहृदयैरपि झटिति संवेद्यम् । यत्र सहृदयात् भिन्नः सामान्यः जनः अपि व्यङ्ग्यार्थं ज्ञातुं शक्नोति तत्र अगूढव्यङ्ग्यगुणीभूतव्यङ्ग्येकाव्यं भवति। महाराष्ट्रप्रदेशस्य कामिनीकुचकलशवद् गूढव्यङ्ग्यार्थः चमत्करोति, किन्तु आन्ध्रप्रदेशस्य कामिनीकुचवद् अगूढव्यङ्ग्यार्थः अत्यन्तस्फुटतया वाच्यवत् प्रतिभाति। अतः अगूढगुणीभूतव्यङ्ग्यम्। *"कामिनीकुचकलशवद् गूढं चमत्करोति, अगूढं तु स्फुटतया वाच्यमानमिति गुणीभूतमेव ॥"* **अगूढं यथा** -

(१) यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीवधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि ॥

इदं गुणीभूतव्यङ्ग्यस्य अर्थान्तरसङ्क्रमितवाच्यागूढव्यङ्ग्यस्य उदाहरणम्। बृहन्नलारूपेण स्थितस्य अर्जुनस्य उक्तिरियम्। अत्र 'जीवन्' इति पदं श्लाघ्यरूपजीवने सङ्क्रमितं भवति। श्लाघ्यजीवनाभावरूपः बोधः अत्र भवति। भृशम् अनुतापः व्यङ्ग्यः। सामान्येन जनेनापि तस्य बोधः भवति। अतः अगूढव्यङ्ग्यम्।

(२) उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥

॥ अथ पञ्चमोल्लासः ॥

चतुर्थे उल्लासे ध्वनिभेदानां विवेचनं कृतम् । पञ्चमे उल्लासे मम्मटाचार्यः गुणीभूतव्यङ्ग्यकाव्यस्य भेदानां निरूपणं करोति ।

॥ गुणीभूतव्यङ्ग्यकाव्यस्य अष्टौ भेदाः ॥

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।

सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥

व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ॥

यत्र वाच्यार्थः व्यङ्ग्यार्थात् अधिकचमत्कारकारको भवति तत्र गुणीभूतव्यङ्ग्यं मध्यमकाव्यं वा उच्यते । गुणीभूतव्यङ्ग्यस्य अष्टौ प्रकाराः यथा –

१. अगूढगुणीभूतव्यङ्ग्यम् ।

२. अपरस्याङ्गगुणीभूतव्यङ्ग्यम् ।

३. वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यम् ।

४. अस्फुटगुणीभूतव्यङ्ग्यम् ।

५. सन्दिग्धप्राधान्यगुणीभूतव्यङ्ग्यम् ।

६. तुल्यप्राधान्यगुणीभूतव्यङ्ग्यम् ।

७. काक्वाक्षिप्तगुणीभूतव्यङ्ग्यम् ।

८. असुन्दरगुणीभूतव्यङ्ग्यम् ।

वस्तुतः ध्वनिकाव्यानां तथा च गुणीभूतव्यङ्ग्यकाव्यानां भेदाः तु सहृदयिजनानाम् अनुभवैः भवन्ति । आनन्दवर्धनाचार्येण तथा च अभिनवगुप्ताचार्येण क्वचित् गुणीभूतव्यङ्ग्यभेदानाम् उल्लेखः कृतः किन्तु विवेचनं न कृतम् । गुणीभूतव्यङ्ग्यभेदोपभेदानां शास्त्रीयं विवेचनं मम्मटाचार्येण काव्यप्रकाशे कृतम् ।

(२) कैलासालयभाललोचनरुचा निर्वर्त्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते ॥

एतस्मिन् पद्ये शृङ्गारः भक्तिभावस्य अङ्गम् । अत्र 'त्रायताम्' इति पदेन पार्वत्याः विषये कवेः भक्तिभावः प्रतीयते तस्य प्राधान्यम् । पार्वतीविषयकः महादेवनिष्ठः सम्भोगशृङ्गारः तु भक्तिभावस्य अङ्गम् ।

प्राचीनालङ्कारिकाणां मतानुसारम् उपर्युक्तोदाहरणे 'रसवद्' इति अलङ्कारः ।

(३) 'अत्युच्चाः०' इत्यत्र भावः अन्यभावस्य अङ्गं भवति । अत्र कोऽपि कविः भोजराजस्य स्तुतिं कुर्वन् अस्ति । अत्र कविनिष्ठः भूमिविषयकरतिभावः राजविषयकरतिभावस्य उत्कर्षं वर्धयति । अतः अपराङ्गगुणीभूतव्यङ्ग्यम् । अत्र 'प्रेयस्' इति अलङ्कारः ।

(४) 'बन्दीकृत्य०' इत्यत्र रसाभासभावाभासौ अन्यस्य भावस्य अङ्गे भवतः । अत्र कवेः राजविषयकः रतिभावः मुख्यः । रसाभासः तथा च भावाभासः तम् उपकुरुतः । रसाभासभावाभासौ अङ्गे स्तः। अतः अत्र 'ऊर्जस्वि' इति अलङ्कारः ।

(५) 'अविरल०' इत्यत्र भावशान्तिः अपरस्य अङ्गम् । वैरिणां (शत्रूणाम्) मदरूपभावशान्त्याः वर्णनं मुख्यम् । कविनिष्ठः राजविषयकः भावः (भक्तिभावः) तस्याङ्गम् । अत्र 'समाहितम्' इति अलङ्कारः ।

(६) 'साकम्०' इत्यत्र त्रासोदयः व्यङ्ग्यम् । तद् व्यङ्ग्यं राजविषयकं रतिभावम् उपकरोति ।

(७) 'असोढा०' इत्यत्र भावद्वयस्य सन्धिः । अत्रावेगधैर्ययोः सन्धिः ।

(८) 'पश्येत्०' इत्यत्र भावशबलता राजविषयकं रतिभावम् उपकरोति।

इदम् अत्यन्ततिरस्कृतवाच्यागूढव्यङ्ग्यस्य उदाहरणम् । एतस्मिन् पद्ये 'चुम्बितः' इति पदं रवौ बाधितं भवति । अतः तत्पदम् अत्यन्तं तिरस्कृतं भवति । एतस्मिन् पद्ये 'प्रभातागमनम्' इति व्यङ्ग्यार्थस्य बोधः वाच्यार्थवत् सरलतया शीघ्रमेव भवति । अतः अगूढव्यङ्ग्यम् ।

(३) अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि ! राक्षसपतेः कृत्ता च कण्ठाटवी ॥

इदं पद्यम् अर्थशक्त्युत्थसंलक्ष्यक्रमागूढव्यङ्ग्यस्य उदाहरणम्। राजशेखरकृतबालरामायणे रामस्योक्तिरियम्। अत्र 'केनापि' इति पदेन 'मया' (रामेण) इति अर्थशक्त्युत्थागूढगुणीभूतव्यङ्ग्यम् । 'केनाप्यत्र' इत्यस्य स्थाने 'तस्याप्यत्र' इति युक्तः पाठः ॥

२. अपरस्याङ्गगुणीभूतव्यङ्ग्यम् -

अपरस्य रसादेर्वाच्यस्य वा अङ्गम्। यत्र व्यङ्ग्यार्थः अन्यस्य वाक्यार्थीभूतस्य अङ्गिनः अङ्गं भवति तदा अपरस्याङ्गगुणीभूतव्यङ्ग्यं भवति। अपरस्य इत्युक्ते रसादेः वाक्यार्थीभूतस्य वाच्यस्य वा अङ्गम् । रसादिरूपेण अनुरणनरूपं (अनुरणं तु असंलक्ष्यम्क्रमदृष्टया संलक्ष्यक्रमव्यङ्ग्यम्) भवति तदा अपराङ्गगुणीभूतव्यङ्ग्य-काव्यम् ।

(१) अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥

एतस्मिन् उदाहरणे महाभारते समरे रणभूमौ अधः पतितं पत्युः हस्तं विलोक्य भूरिश्रवसः भार्या विलापं कुर्वती अस्ति । अत्र शृङ्गारः व्यङ्ग्यः किन्तु प्रधानरसः करुणः । अतः शृङ्गाररसः करुणस्य अङ्गं भवति । अतः अपराङ्गगुणीभूतव्यङ्ग्यम् ।

४. अस्फुटगुणीभूतव्यङ्ग्यम् -

सहृदयानामपि दुःखसंवेद्यम् । यत्र सहृदयजना अपि सरलतया व्यङ्ग्यार्थं ज्ञातुं न शक्नुवन्ति तत्र अस्फुटगुणीभूतव्यङ्ग्यम् । तद्यथा -

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥

एतस्मिन् उदाहरणे व्यङ्ग्यार्थः अस्फुटः अस्पष्टः वा । 'अत्रादृष्टो यथा न भवसि वियोगभयं च यथा नोत्पद्येत तथा कुरु' इति व्यङ्ग्यार्थः क्लिष्टः । अतः अस्फुटगुणीभूतव्यङ्ग्यम् ।

५. सन्दिग्धप्राधान्यगुणीभूतव्यङ्ग्यम् -

सन्दिग्धं चमत्कारजनने वाच्यव्यङ्ग्ययोः सन्देहभूतं प्राधान्यं यत्र तत् । यत्र वाच्यार्थः प्रधानः व्यङ्ग्यार्थः वा इति संशयः भवति तत्र सन्दिग्धप्राधान्यगुणीभूतव्यङ्ग्यम् । (सन्दिग्धं प्राधान्यं यत्र) यथा -

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥

कुमारसम्भवस्य एतस्मिन् उदाहरणे वसन्तागमने क्षुब्धस्य हरस्य वर्णनम् । अत्र परिचुम्बितुमैच्छदिति व्यङ्ग्यः प्रधानः, विलोचन-व्यापाररूपवाच्यः वा प्रधानः इति सन्देहः । अतः सन्दिग्धात् प्राधान्यात् सन्दिग्धप्राधान्यगुणीभूतव्यङ्ग्यम् ।

६. तुल्यप्राधान्यगुणीभूतव्यङ्ग्यम् -

यत्र चमत्कारोत्पादने वाच्यार्थव्यङ्ग्यार्थयोः समानं प्राधान्यं वर्तते तत्र तुल्यप्राधान्यगुणीभूतव्यङ्ग्यम् । (तुल्यं प्राधान्यं वाच्यव्यङ्ग्ययोः यत्र) यथा -

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ॥

"एते रसवदाद्यलङ्कारा: । यद्यपि भावोदयभावसन्धिभाव-शबलत्वानि नालङ्कारतया उक्तानि । तथापि कश्चिद् ब्रूयादित्येवमुक्तम्।" प्राधान्येन व्यपदेशाः भवन्ति । - (काव्यप्रकाश-वृत्तिः)

३. वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यम् -

वाच्यसिद्धेरङ्गं निदानं वाच्यस्य सिद्धिरेव यदधीना तदिति यावत्। यत्र वाच्यार्थस्य सिद्धिः व्यङ्ग्यार्थाधीना वर्तते तत्र वाच्य-सिद्ध्यङ्गगुणीभूतव्यङ्ग्यकाव्यम्। वाच्यसिद्ध्यङ्गमपि द्विविधम्- एकवक्तृवाच्यसिद्ध्यङ्गम् भिन्नवक्तृवाच्यसिद्ध्यङ्गं च। यथा -

(१) भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥

अत्र एतस्मिन् उदाहरणे उद्दीपनरूपेण वर्षायाः वर्णनम् । अत्र 'विषम्' इति पदस्य 'गरलम्' इति व्यङ्ग्यार्थः । 'विषम्' इति शब्दः अनेकार्थकः किन्तु प्रकरणादिद्वारा जलार्थे तस्य अभिधा नियन्त्रिता । अत्र 'विषम्' इति शब्दस्य गरलमिति व्यञ्जनया प्रतिपत्त्या जलेन सह अभेदग्रहणं भवति । अतः 'विषात् अभिन्नं जलम्' इति ज्ञानं भवति । तेन 'जलदः एव भुजगः' इति वाच्यार्थः सिद्ध्यति ।

(२) गच्छाम्यच्युत ! दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किन्त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥

अत्र अच्युतस्य व्यङ्ग्यार्थः - 'मम (नायिकायाः) सान्निध्यात् अपि भवान् धैर्यच्युतः न भवति अतः अत्र किमर्थं तिष्ठामि' इति । दर्शनेन 'सम्भोगेन तृप्तिः' इति व्यङ्ग्यः । 'किन्तु' पदस्य व्यङ्ग्यार्थः 'इदानीम् अप्रसिद्धिः जाता । अतः आत्मखेदः निरर्थकः' इति । अच्युतादिपदानां व्यङ्ग्यार्थेन विना वाच्यार्थः न सिद्ध्यति । अत्र गोपी तथा च कविः वक्तृवेन, अतः भिन्नवक्तृवाच्यसिद्ध्यङ्गम् ।

[illegible]

[illegible]

[illegible]

०००

महावीरचरितनाटके रावणाय माल्यवन्तं परशुरामेण प्रेषिते पत्रे एतत् पद्यं वर्तते । अत्र जामदग्न्यः सर्वेषां क्षत्रियाणाम् इव रक्षसां क्षणात् क्षयं करिष्यतीति व्यङ्ग्यस्य मित्रतायाः कल्याणोपदेशः इति वाच्यस्य समं प्राधान्यम् । अतः तुल्यप्राधान्यगुणीभूतव्यङ्ग्यम् ॥

७. काक्वाक्षिप्तगुणीभूतव्यङ्ग्यम् -

यत्र काकुद्वारा आक्षिप्तं व्यङ्ग्यार्थं विना वाच्यार्थस्य स्वरूपं निष्पन्नं न भवति तत्र काक्वाक्षिप्तगुणीभूतव्यङ्ग्यम् । यथा -

मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥

वेणीसंहारे नाटके भीमसेनस्य सहदेवं प्रति उक्तिरियम् । अत्र भीमसेनः 'न मथ्नामि..' इति निषेधार्थकवचनानि कथयति । एतानि वचनानि बाधितानि भूत्वा नञर्थे काकोः प्रतीतिं कारयन्ति । तस्मात् काक्वा 'न मथ्नामि इति न' अपि तु 'मथ्नाम्येव' इति व्यङ्ग्यार्थः अभिव्यक्तः भवति । अत्र मथ्नाम्येवेत्यादि व्यङ्ग्यं वाच्यनिषेधेन सहैवोपस्थितः भवति । अतः काक्वाक्षिप्तगुणीभूतव्यङ्ग्यम् ॥

८. असुन्दरगुणीभूतव्यङ्ग्यम् -

स्वभावादेव वाच्यापेक्षयाऽचारु । यत्र व्यङ्ग्यार्थः स्वाभाविकतया वाच्यार्थतः चमत्कारकारकः न भवति तत्र असुन्दरगुणीभूतव्यङ्ग्यम् । यथा -

वानीरकुञ्जोड्डीन-शकुनिकोलाहलं शृण्वन्त्याः ।
गृहकर्मव्यापृतायाः वध्वाः सीदन्त्यङ्गानि ॥

एतस्मिन् उदाहरणे 'अङ्गानि सीदन्ति' इति वाच्यं 'दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्टः' इति व्यङ्ग्यात् सचमत्कारम् । अतः असुन्दरगुणीभूतव्यङ्ग्यम् ॥

विभावादिप्रयोगे रसव्यञ्जना अप्रयोगे न रसव्यञ्जना इति अन्वयव्यतिरेकाभ्यां विभावाद्यैः रसः प्रतीयते इति निश्चीयते। मुख्यार्थबाधादीनाम् अभावात् लक्षणया अपि रसादि न प्रतीयते।

॥ लक्षणामूलध्वनौ व्यञ्जनायाः अनिवार्यता ॥

वस्त्वलङ्कारसध्वनयः न तु अभिधायाः विषयः न वा लक्षणायाः। तत्र व्यङ्ग्यमेव। अभिधामूलध्वनौ असंलक्ष्यक्रम-व्यङ्ग्यरसादिरूपस्य अर्थस्य प्रतीत्यर्थं व्यञ्जनायाः अनिवार्यता अस्ति एव। तथैव लक्षणामूलध्वनौ अपि व्यञ्जनायाः अनिवार्यता। लक्षणामूलध्वनेः अर्थान्तरसङ्क्रमितवाच्ये 'त्वामस्मि वच्मि०' इत्यत्र तथा च अत्यन्ततिरस्कृतवाच्ये 'उपकृतं बहु०' इत्यत्र प्रथमोदाहरणे 'वच्मि' इत्यादिपदानि उपदेशादिरूपे परिणमन्ति। द्वितीयोदाहरणे 'उपकृतम्' इत्यादिपदानि अपकृतादिरूपे परिणमन्ति। अत्र व्यङ्ग्यप्रतीतिः हि लक्षणायाः आधारः। व्यङ्ग्यप्रयोजनेन विनैव तत्र लक्षणा अपि न सम्भवति। एवं लक्षणया अभिधया च व्यङ्ग्यप्रयोजनस्य बोधः न भवति। अतः पूर्वम् उक्तं यत् – **नाभिधा समयाभावात् हेत्वभावान्न लक्षणा** ॥ इति ॥ व्यङ्ग्येऽपि लक्षणास्वीकरणेन द्वितीयप्रयोजनस्य आवश्यकता-वशात् अनवस्थादोषः भविष्यति। अतः लक्षणामूलध्वनौ अर्थान्तरसङ्क्रमितवाच्ये अत्यन्ततिरस्कृतवाच्ये च प्रयोजनप्रतीत्यर्थं व्यञ्जना अपेक्षिता। तत्र वस्तुमात्रव्यङ्ग्यम्।


॥ अभिधामूलध्वनौ शब्दशक्त्युत्थे व्यञ्जनायाः अनिवार्यता ॥

अभिधामूलध्वनेः (विवक्षितान्यपरवाच्यस्य) भेदद्वयम्, असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यः च। तत्र असंलक्ष्यक्रमव्यङ्ग्ये (रसादौ) व्यञ्जनायाः अनिवार्यता दर्शिता। अतः संलक्ष्यक्रमव्यङ्ग्ये व्यञ्जनायाः अनिवार्यतां दर्शयितुं विवेचनं क्रियते। *"शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम्।"* संलक्ष्यक्रमव्यङ्ग्यस्य त्रयः भेदाः; शब्दशक्त्युत्थः अर्थ-शक्त्युत्थः उभयशक्त्युत्थश्च। तत्र अनेकार्थकशब्दानां प्रकरणादिवशात् एकार्थे नियन्त्रिते अन्यार्थस्य या प्रतीतिः भवति सः शब्दशक्त्युत्थः

॥ व्यञ्जनायाः स्थापना (अपरिहार्यता) ॥

ध्वनिकाव्ये गुणीभूतव्यङ्ग्ये च व्यङ्ग्यार्थो भवति। ध्वनि-गुणीभूतव्यङ्ग्ययोः प्रकाराणां निरूपणं कृत्वा मम्मटाचार्यः व्यञ्जनायाः स्थापनां करोति।

व्यङ्ग्यस्य त्रिरूपत्वात् ध्वनेः त्रयः भेदाः भवन्ति। तेषु भेदेषु केचन वाच्यतां सहन्ते केचन न। वाच्यतासहत्वमपि द्विविधम् - अविचित्रं विचित्रं च। अविचित्रं वस्तुमात्रम्, विचित्रं तु अलङ्कारमात्रम्।



तथा च अलङ्कारध्वनिः कुत्रचित् वाच्यं कुत्रचित् च व्यङ्ग्यमपि भवति। किन्तु रसादिध्वनिः सर्वथा व्यङ्ग्यमेव। काव्ये आस्वादनीय-तत्त्वम्, अलङ्काराः तु शोभावर्धकाः (अलङ्क्रियतेऽनेन इति अलङ्कारः) अतः उपमादयः अलङ्काराः। व्यञ्जनया प्रतीयमानाः उपमादयोऽलङ्काराः चमत्कारकत्वेन प्राधान्येन अलङ्कार्यम्। किन्तु ब्राह्मणश्रमणन्यायेन ते अलङ्काराः।

रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः। रसादिव्यङ्ग्यार्थः अभिधया न प्रकटीभवति अतः वाच्यतऽसहः। यदि अभिधया रसभावादिकं प्रकटीभवति चेत् रसशब्देन शृङ्गारादिशब्देन वा अभिधया रसस्य प्रतीतिः भवति। किन्तु काव्यमर्मज्ञानाम् अनुभवैः ज्ञायते यत् विभावानुभावव्यभिचारिभावैः रसः प्रतीयते। विभावादीनाम् अप्रयोगे रसानुभूतिः न भवति। तत्र रसशृङ्गारादिशब्दानां प्रयोगः न भवति। अतः

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

अन्विताभिधानवादिनः प्रभाकरादयः एतेषु उपायेषु व्यवहारं सङ्केतग्रहस्य प्रधानं साधनं वदन्ति । सङ्केतग्रहस्य त्रीणि प्रमाणानि – प्रत्यक्षप्रमाणम् अनुमानप्रमाणम् अर्थापत्तिश्च

(१) प्रत्यक्षम् –

व्यवहारे बालकः उत्तमवृद्धं तथा मध्यमवृद्धं चक्षुषा प्रत्यक्षीकरोति। अनन्तरं 'गामानय' इत्यादिवाक्यानि श्रोत्रद्वारा शृणोति । एवम् अभिधेयार्थस्य तथा च शब्दस्य चाक्षुषश्रावणप्रत्यक्षेण ग्रहणं भवति । '<u>शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति</u> ॥'

(२) अनुमानम् –

प्रत्यक्षप्रमाणानन्तरं वाचकेन अनुमानस्य प्रयोगः करणीयः वर्तत। सः बालकः उत्तमवृद्धस्य वाक्यं श्रुत्वा गवानयने कार्यरतं मध्यमवृद्धम् अवलोक्य अनुमानं करोति यत् मध्यमवृद्धस्य एषः व्यापारः (क्रिया) उत्तमवृद्धस्य वाक्यं श्रुत्वा ज्ञात्वा च भवति । एवं बालकः चेष्टया श्रोतुः (मध्यमवृद्धस्य) प्रतिपन्नत्वं (ज्ञानवत्त्वम्) अनुमानेन (अनुकरणपूर्वकं) पश्यति । 'श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥'

(३) अर्थापत्तिः –

सङ्केतग्रहणस्य तृतीयप्रमाणम् । 'अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनमर्थापत्तिः ।' अर्थात् अनुपपद्यमानार्थं दृष्ट्वा तस्य उपपादकार्थस्य कल्पना क्रियते सा अर्थापत्तिः । यथा – *'पीनो देवदत्तः दिवा न भुङ्क्ते...'* इति दृष्ट्वा श्रुत्वा वा *'...रात्रिभोजनं लभते ।'* इति ज्ञायते । अत्र 'पीनत्वम्' इति अनुपपद्यमानार्थः तथा च रात्रिभोजनं तस्य उपपादकार्थः । अतः अर्थापत्तेः विषयः । तथैव 'गामानय', 'अश्वमानय' इत्यत्र वाच्यवाचकभावसम्बन्धस्य ग्रहणम् अर्थापत्त्या भवति । अत्र 'अर्थबोधः' अनुपपद्यमानः । वाच्यवाचकभावसम्बन्धः उपपादकीभूतः । अन्विताभिधानवादिनाम् अनुसारं "विशिष्टा एव पदार्थाः वाक्यार्थः न तु पदार्थानां

। अन्यार्थस्य प्रतीतिः अभिधया भवितुं न शक्नोति । एतस्मिन् स्थाने प्रतीयमानानां प्राकरणिकार्थानाम् अप्राकरणिकार्थानां च उपमानोपमेय-भावात् अलङ्काराणां बोधः व्यञ्जनया भवति । यथा – 'उल्लास्य कालकरवालमहाम्बुवाहम्' इत्यत्र उपमालङ्कारः व्यङ्ग्यः ।

॥ अभिधामूलध्वनौ अर्थशक्त्युत्थे व्यञ्जनायाः अनिवार्यता ॥

॥ अभिहितान्वयवादे व्यञ्जना ॥

शब्दशक्त्युत्थे व्यञ्जनायाः प्रतिपादनं कृत्वा मम्मटाचार्यः अभिधामूलध्वनेः अर्थशक्त्युत्थस्य अष्टादशसु भेदेषु व्यञ्जनायाः प्रतिपादनं करोति । "अर्थशक्तिमूलेऽपि विशेषे सङ्केतः कर्तुं न युज्यत इति सामान्य-रूपाणां पदार्थानाम् आकाङ्क्षासन्निधियोग्यतावशात् परस्परसंसर्गो यत्रापदार्थोऽपि विशेषरूपो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्ता व्यङ्ग्यस्याभिधेयतायाम् ।" अर्थशक्त्युत्थे व्यङ्ग्यार्थात् पूर्वं वाच्यार्थस्य प्रतीतिः भवति वाच्यार्थेन च व्यङ्ग्यार्थस्य प्रतीतिः । अतः अर्थशक्त्युत्थः । वाक्यार्थः कथं प्रतीयते तस्य कृते त्रीणि शास्त्राणि सन्ति, व्याकरणशास्त्रं न्यायशास्त्रं मीमांसाशास्त्रं चेति । वाक्यविचारः मीमांसाशास्त्रे प्रमुखः । मीमांसकानां सम्प्रदायद्वयम्- अभिहितान्वयवादः अन्विताभिधानवादश्चेति । कुमारिलभट्टादयः अभिहितान्वयवादिनः तथा च प्रभाकरादयः अन्विताभिधानवादिनः । अभिहितान्वयवादे अभिधायाः पदार्थानाम् उपस्थितिः भवति । अनन्तरम् आकाङ्क्षायोग्यतासन्निधिवशात् पदानां परस्परसंसर्गात्मिका वाक्यार्थप्रतीतिः तात्पर्येण भवति । तात्पर्येण वाक्यार्थः प्रतीयते न तु पदार्थः। तर्हि वाक्यार्थात् भिन्नः व्यङ्ग्यार्थः अभिधया कथं वाच्यः भवति ? अतः अभिहितान्वयवादेऽपि व्यङ्ग्यार्थबोधस्य कृते व्यञ्जनायाः अनिवार्यता ।

॥ अन्विताभिधानवादे व्यञ्जना ॥

प्रभाकरादयः अन्विताभिधानवादिनः । तेषां मतानुसारम् अभिधया अन्वितपदार्थानां बोधः भवति । अतः वाक्यार्थप्रतीतेः कृते तात्पर्याख्यशक्तेः आवश्यकता नास्ति । सामान्यतः शक्तिग्रहस्य अनेके उपायाः –

बोधः भवति । व्यञ्जनावृत्तेः का अपेक्षा ?

समाधानम् – (सिद्धान्तपक्षः)

मीमांसकानुसारेण शब्दतः यः व्यङ्ग्यार्थः प्रतीयते तेन शब्दः तु केवलं ज्ञापकत्वरूपः निमित्तत्वरूपो वा भवति । किन्तु शब्दः ज्ञापकत्वं निमित्तत्वं वा तदैव प्राप्नोति यदा तस्मिन् अर्थे शब्दस्य सङ्केतग्रहणं भवेत् ।

किन्तु मीमांसकानां सिद्धान्तानुसारं सङ्केतः केवलं सामान्यान्वितमात्रे गृहीतः भवति । विशेषे सङ्केतग्रहणं न भवति । अतः निमित्तरूपशब्दस्य यावत्कालपर्यन्तं व्यङ्ग्यरूपविशेषेण सह निश्चितरूपेण सम्बन्धः – सङ्केतग्रहः न भवति तावत्कालपर्यन्तम् अभिधया व्यङ्ग्यार्थः कथं प्रतीयेत ? कुत्रापि व्यङ्ग्यार्थस्य सङ्केतग्रहणं न । अतः सङ्केताभावात् "नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते ।" इति कथनं तु अविवेकपूर्णम् ।

॥ भट्टलोल्लटस्य पूर्वपक्षः ॥

भट्टलोल्लटः मीमांसाशास्त्रानुयायी । तस्य मतानुसारं व्यङ्ग्यार्थस्य प्रतीतिः अभिधाव्यापारेण भवति । अभिधाव्यापारः अपि बाणवत् दीर्घदीर्घतरः भवति – 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः ।' यथा कस्यचित् बलिष्ठस्य बाणप्रहारेण शत्रोः वर्मभेदनं चर्मभेदनं तथा च मर्मभेदनं भवति तथैव अभिधाव्यापारः पदार्थोपस्थितिम् अन्वयबोधं व्यङ्ग्यार्थप्रतीतिं च कारयितुं शक्नोति । यावत्पर्यन्तं वक्तुः तात्पर्यं भवति तावत्पर्यन्तम् अभिधया बोधः भवति । आचार्यः धनिकोऽपि समर्थयते यत् –

"तात्पर्यव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः ।

यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥"

अर्थात् तात्पर्यं तुलया न धृतम् अपि तु यत्र वक्तुः अर्थस्य आवश्यकता वर्तते तत्र पर्यन्तं तात्पर्यं ज्ञेयम् । यतः यस्मिन् अर्थे यस्य शब्दस्य तात्पर्यं सः तस्य शब्दस्य अर्थः उच्यते । उक्तं हि – "यत्परः शब्दः स शब्दार्थः ।" अतः 'निःशेषच्युतचन्दनम्०' इत्यत्र 'नायकान्तिकगमनम्' इति विधौ तात्पर्यं न तु व्यङ्ग्यम् ।

वैशिष्ट्यम्।" अर्थात् अन्विताभिधानवादे वाक्यात् परस्परान्वितपदार्थाः एव वाक्यार्थरूपेण उपस्थिताः भवन्ति। केवलपदार्थानामुपस्थित्यनन्तरं तेषाम् अन्वयः न भवति।

- अत्र गाम्, अश्वम् इत्यादिपदानि विशेषे सति कर्मत्वे सामान्ये 'आनय' इति पदेन अन्वितानि भवन्ति। एतत् सामान्यं साधारणरूपेण अन्वितमात्रम्।
- सामान्यविशेष इत्युक्ते 'कर्मत्वादिरूपात् अन्वितत्वात्' यथा 'गामानय', 'अश्वमानय'।
- अतिविशेष इत्युक्ते गवाश्वादयः व्यक्तिविशेषरूपेण सह अन्वितत्वम्।

यत्र 'गाम्, अश्वम्' इत्यादिपदानि विशेषे सति कर्मत्वरूपसामान्ये ('आनय' इति पदेन सह) अन्वितानि भवन्ति एतत् सामान्यविशेषरूपम्। अतः 'निर्विशेषं न सामान्यम्' इति न्यायेन सामान्यविशेषे सङ्केतग्रहणं भवति। अतिविशेषे सङ्केतं स्वीकुर्मः चेत् आनन्त्यं तथा च व्यभिचारः दोषः भवति। अतिविशेषार्थस्य बोधस्य कृते तात्पर्यशक्तिः अपेक्षिता। अत्र व्यक्तिविशेषः असङ्केतितः। अतः वाक्यार्थबोधस्य कृते अभिधानभिन्नशक्तिः कल्पनीया वर्तते। तर्हि व्यङ्ग्यार्थस्य बोधः अभिधया कथं भवितुं शक्नोति ? यत्र वाच्यार्थः एव पदार्थः प्रतिपद्यते तत्र अर्थान्तरभूतस्य 'निःशेषच्युत०' इत्यादौ विध्यादेश्चर्चा दूरे।

॥ व्यङ्ग्यार्थस्य बोधः अभिधया न शक्यते ॥

अभिधया व्यङ्ग्यार्थस्य प्रतीतिः न शक्यते। मम्मटाचार्यः एतस्मिन् विषये वृत्त्याम् अभिधावादिनां खण्डनं करोति।

– मीमांसकानुसारेण – (पूर्वपक्षीयशङ्का)

"नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते।" अर्थात् नैमित्तिककार्येण निमित्तकारणस्य कल्पना क्रियते। अतः व्यङ्ग्यार्थः नैमित्तिकः (कार्यः) सः केनचित् शब्देन प्रतीयते। निमित्तं द्विविधम् – कारकं ज्ञापकं च। अत्र निमित्तत्वं कारकत्वरूपं न अपि तु ज्ञापकत्वरूपं बोधकत्वरूपं वा भवति। बोध्यबोधकसम्बन्धः तु अभिधाशक्तिः। यतः शब्देन अर्थबोधकारिणी शक्तिरेव अभिधा। अतः अभिधया हि व्यङ्ग्यार्थस्य

- तात्पर्यवचोयुक्त्या वाक्ये स्थिते शब्दे एव वाक्यस्य तात्पर्यम् । किन्तु व्यञ्जनया यः अर्थः प्रतीयते तस्य अर्थस्य बोधकः शब्दः वाक्ये न भवति ।
- यदि दीर्घदीर्घतरं व्यापारं स्वीकुर्मः चेत् 'ब्राह्मण ! पुत्रस्ते जातः ।' 'ब्राह्मण ! कन्या ते गर्भिणी' इत्यत्र हर्षशोकादयः अपि वाच्यं भविष्यन्ति ।
- लक्ष्यार्थस्य बोधः अपि अभिधया भविष्यति ।
- मीमांसादर्शने – श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान–समाख्यानां बलाबलसिद्धान्तः अपि निरर्थकः भविष्यति ।

अतः अन्विताभिधानवादे 'निःशेषच्युतचन्दनम्' इति स्थाने नायकान्तिकगमनरूपविधिः व्यङ्ग्यः ।

॥ व्यञ्जनां विना गुणदोषव्यवस्था अनुपपन्ना भवति ॥

- व्यञ्जनायाः स्वीकारेणैव गुणदोषविभागकरणं शक्यते । यथा 'कुरु रुचिम्' इति पदयोः वैपरीत्ये (रुचिङ्कुरु) अश्लीलदोषः आगच्छति। एषः अर्थः (विपरीतः अर्थः) अभिधया अगम्यः भवति। यतः पदार्थान्तरैः अन्वितः न भवति । अतः अभिधायाः विषयः न अपि तु व्यञ्जनायाः विषयः । अन्यथा कथं दोषः ? तेन काव्ये अपरित्याज्यत्वं स्यात् ।
- "यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयते यदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात् ।"

ये व्यञ्जनां न स्वीकुर्वन्ति तेऽपि च्युतसंस्कृत्यादयः नित्यदोषाः तथा च श्रुतिकटुत्वादयः अनित्यदोषाः इति अङ्गीकुर्वन्ति । किन्तु यदि वाच्यवाचकभावात् भिन्नं व्यङ्ग्यव्यञ्जकभावं न स्वीकुर्मः तर्हि असाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनाम् अनित्यदोषत्वम् इति विभागकरणं न शक्यते ।

- वाच्यवाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचित् औचित्येन विभागव्यवस्था भवत्येव । यथा कुमारसम्भवे

समाधानम् -

मीमांसकैः 'यत्परः शब्दः स शब्दार्थः' इति वेदवाक्यस्य यत् तात्पर्यं निष्कासितं तेन लक्ष्यव्यङ्ग्याादयः सर्वे अर्थाः वाच्यार्थाः भवन्ति। वस्तुतः मीमांसकाः उक्तवाक्यस्य तात्पर्ये अनभिज्ञाः । यतः 'यत्परः शब्दः स शब्दार्थः' इति वाक्यस्य अर्थं मीमांसकाः एवं कुर्वन्ति -'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादिना वैदिकवाक्ये होमक्रियायाः विधानम्। कुत्रचित् 'दध्ना जुहोति' इत्यत्र दधिरूपसाधनं विधानम् अभिप्रेतम्। 'सोमेन यजेत' इत्यत्र अप्राप्तसोमयागयोः विधानम् अभिप्रेतम्। वैदिकविधिवाक्ये यावान् अंशः प्रमाणान्तरेण अप्राप्तः भवति तावतः अंशस्य विधानम् अभिप्रेतं वर्तते । यथा वह्निः अदग्धस्य दहनं करोति तथैव वैदिकवाक्यानि अपि अप्राप्तस्य विधानं कुर्वन्ति। एतस्यां स्थितौ यस्य अप्राप्तस्य बोधने विधिवाक्यस्य तात्पर्यं भवति तत् तस्य विधिवाक्यस्य तात्पर्यं विधेयं प्रतिपाद्यं वा भवति। एषः 'यत्परः शब्दः स शब्दार्थः' इत्यस्य अर्थः ।

अतः लक्ष्यार्थ-व्यङ्ग्यार्थादयः वाच्यार्थाः भवन्ति इति 'यत्परः शब्दः स शब्दार्थः' इत्यस्य अर्थः कदापि न भवति। एवं कृते कुमारिलभट्टादयः मीमांसकाः किमर्थं लक्षणां स्वीकुर्वन्ति ? अतः भट्टलोल्लटादयः मीमांसकाः तात्पर्यवचोयुक्त्या व्यङ्ग्यार्थं वाच्यार्थीकर्तुम् इच्छन्ति, ते वस्तुतः वास्तविकम् अर्थं न जानन्ति । स्वशास्त्रज्ञानतया आचार्यः मम्मटः तान् 'देवानां प्रियाः' इति सम्बोधयति। अतः 'दध्ना जुहोति' इत्यादौ दध्यादेः करणत्वमात्रं विधेयम्। व्यञ्जनावादिनः यं व्यङ्ग्यार्थं वक्तुमिच्छन्ति तस्य वाचकः कोऽपि शब्दः वाक्ये उपात्तः न भवति। अतः तस्मिन् तात्पर्यं न प्रतीयते।

॥ सङ्क्षेपेण ॥

(१) अभिधया सङ्केतितार्थस्य बोधः भवति, किन्तु शब्दस्य व्यङ्ग्यार्थेन सह सङ्केतग्रहः न भवति। अतः 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते।' इति नियमानुसारम् अभिधया व्यङ्ग्यार्थः न प्रतीयते।

(२) 'यत्परः शब्दः स शब्दार्थः' इति नियमेन भट्टलोल्लटादयः मीमांसकाः व्यङ्ग्यार्थम् अभिधया दीर्घदीर्घतराभिधाव्यापारस्य विषयं सिद्धं कर्तुं यत्नं कुर्वन्ति तदपि असमीचीनम्, यतः -

(४) निमित्तभेदः -

वाच्यार्थस्य बोधः शब्दानुशासनज्ञानेन (व्याकरण-कोशादीनां ज्ञानेन) भवति। व्यङ्ग्यार्थस्य बोधः प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन शब्दानुशासनज्ञानेन भवति।

(५) कार्यभेदः -

वाच्यार्थस्य कार्यं (प्रभावः) भिन्नम्, व्यङ्ग्यार्थस्य कार्यमपि भिन्नम्। येन कार्यबोधः क्रियते सः बुद्धः कथ्यते, किन्तु येन व्यङ्ग्यार्थस्य प्रतीतिः क्रियते सः बुद्धेन सह सहृदयी अपि उच्यते। वाच्यार्थः केवलं प्रतीयते किन्तु व्यङ्ग्यार्थः चमत्करोति।

(६) सङ्ख्याभेदः -

'गतोऽस्तमर्कः' इत्यादौ वाच्याऽर्थः एकः, क्वचित् अन्यथा न भवति। किन्तु प्रतीयमानस्तु (व्यङ्ग्यार्थः) तत्तत्प्रकरण-वक्तृ-प्रतिपत्तादिविशेषसहायतया नानात्वं भजते।

(७) विषयभेदः -

"कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्॥"

इत्यादौ वाच्यार्थस्य विषयः नायिका, किन्तु व्यङ्ग्यार्थस्य विषयः नायकः, प्रतिवेशित्वेन वा श्वश्रूः भवितुं शक्नोति।

॥ वाचकव्यञ्जकशब्देषु भेदः ॥

वाचकशब्दः यस्य ज्ञानं कारयितुं शक्नोति यस्मिन् तस्य (वाचकस्य) सङ्केतग्रहः भवति। अतः वाच्यतायाः कृते सङ्केतितार्थस्य अपेक्षा वर्तते, किन्तु व्यङ्ग्यार्थः कस्यापि अर्थस्य अपेक्षां नार्हति। वाचकतातः व्यञ्जकता भिन्ना एव। यतः यः अर्थः अभिधावृत्तेः तात्पर्यवृत्तेः वा विषयो न भवति तस्य अर्थस्य प्रतीतिः केन व्यापारेण भवेत्? यथा -

"वानीरकुञ्जोड्डीन-शकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि॥"

– **द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।**
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

अत्र 'कपालिन्' इति प्रयोगः काव्यानुकूलः, न तु 'पिनाकिन्' इति । द्वयोः अभिधेयार्थः शिवः किन्तु दरिद्रता बीभत्सता इत्यादीनां गुणानां प्रतीतिः 'कपालिन्' इति पदेन भवति न शिवस्य वाचकेन 'पिनाकिन्' इति पदेन । अत्र शिवनिन्दारूपं तात्पर्यं व्यञ्जनया सिद्ध्यति ।

॥ वाच्यार्थव्यङ्ग्यार्थयोः प्रतीतिभेदः ॥

वाच्यार्थव्यङ्ग्यार्थयोः प्रतीतौ सङ्ख्या-स्वरूप-कालाश्रय-निमित्त-व्यपदेश-कार्य-विषयादीनां भेदात् वाच्यार्थव्यङ्ग्यार्थयोः भेदः आवश्यकः। साहित्यदर्पणकारेणापि उक्तम् -

बोद्धृ-स्वरूप-सङ्ख्या-निमित्त-कार्य-प्रतीति-कालानाम् ।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ॥

(१) स्वरूपभेदः -

– 'निःशेषच्युत०' इत्यत्र वाच्यार्थः निषेधात्मकः व्यङ्ग्यार्थः च विधेयात्मकः ।

– **"मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु ।**
सेव्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥"

अत्र वाच्यार्थः संशयरूपः व्यङ्ग्यार्थः च निश्चयरूपः । – 'कथम्' इत्यत्र वाच्यार्थः निन्दारूपः व्यङ्ग्यार्थस्तु स्तुतिरूपः ।

(२) कालभेदः -

पूर्वपश्चाद्भावेन प्रतीतेः कालस्य वाच्यार्थानन्तरं व्यङ्ग्यार्थः प्रतीयते।

(३) आश्रयभेदः -

वाच्यार्थस्य प्रतीतिः शब्दाश्रयत्वेन व्यङ्ग्यार्थस्य प्रतीतिः शब्दतदेकदेशतदर्थवर्णसङ्घटनाश्रयत्वेन च ।

इत्यादौ सम्बन्धसम्बन्धः (परम्परितसम्बन्धः)। अतः अभिधालक्षणाभ्यां व्यञ्जना भिन्ना एव।

(५) केवलं लक्षणामूले एव न अपि तु अभिधामूलेऽपि ध्वनौ (रसादौ वा) व्यङ्ग्यार्थः प्रतीयते।

(६) कुत्रचित् वर्णादिद्वारा क्वचित् कटाक्षादिव्यापारैः व्यङ्ग्यार्थः प्रतीयत।

एवम्; अभिहितान्वयवादिनः कुमारिलभट्टाः अन्विताभिधानवादिनः प्रभाकरभट्टाः दीर्घदीर्घतराभिधाव्यापारवादिनः भट्टलोल्लट–मुकुलभट्टादयः मीमांसकाः व्यञ्जनाविरोधिनः। तेषां सर्वेषां खण्डनं मम्मटाचार्येण कृतम्। एवं व्यञ्जनायाः सिद्धिः कृता सफलता च प्राप्ता।

॥ अखण्डार्थतावादेऽपि व्यञ्जना ॥

"अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्, इति येऽप्याहुः तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽप्यवश्यमुक्तोदाहरणादौ वध्यादिर्व्यङ्ग्य एव।" – काव्यप्रकाशे वृत्त्याम्।

वेदान्तग्रन्थेषु 'संसर्गागोचरप्रमितिजनकत्वम् अखण्डार्थत्वम्' इति अखण्डार्थवाक्य उक्तम्। अथवा क्रियाकारकभावादिभिः खण्डैः वाक्यस्य वाक्यार्थस्य वा विभागाः कर्तुं न शक्यन्ते तत् अखण्डवाक्यम्। यतः क्रियाकारकभावः धर्मधर्मीभावाश्रितः। पुनश्च जगत् मिथ्या, अतः पारमार्थिकरूपेण अभिधालक्षणाव्यञ्जनानाम् आवश्यकता न भवति। व्यावहारिकरूपेण तासाम् आवश्यकता वर्तते। ब्रह्म निर्गुणम्। तस्मिन् धर्मधर्मीभावः कथं सम्भवति ? तेन पदपदार्थविभागद्वये शून्ये अखण्डबुद्ध्या वाक्यार्थः एव वाच्यः। वाक्यार्थबोधे बुद्धिः क्रियाकारकादीनां भावानां ग्रहणं न करोति किन्तु अखण्डवाक्यस्य ग्रहणं करोति। अतः व्यङ्ग्यार्थस्य बोधः अपि वाक्यशक्त्या एव भवति। यथैव वेदान्तिनः अखण्डार्थवादिनः तथैव वैयाकरणाः अपि अखण्डार्थवादिनः। ते अद्वितीयब्रह्मतत्त्वस्य स्थाने एकमात्रं स्फोटरूपशब्दब्रह्मतत्त्वं स्वीकुर्वन्ति। एवम् 'अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्' इत्यस्य अर्थः। अनन्तरं 'तैरप्यविद्यापतितैः०' इति पङ्क्त्या काव्यप्रकाशकारेण तेषां खण्डन कृतम्। वेदान्तवादिनः एतस्मिन् संसारे अनेकेषां

इत्यादौ 'कश्चिल्लतागृहं प्रविष्टः' इति व्यङ्ग्यार्थस्य अपेक्षया 'सीदन्त्यङ्गानि' इति वाच्यार्थः अधिकं चमत्करोति। अत्र वाच्यार्थः एव तात्पर्यस्य विषयः। अतः व्यङ्ग्यार्थः न तु तात्पर्यभूतः नापि अभिधेयः। यतः 'यत्परः शब्दः सः शब्दार्थः' इति नियमेन यः विधेयः (तात्पर्यस्य विषयः) भवति सः अभिधेयः। अतः व्यङ्ग्यार्थस्य प्रतीतेः कृते एकः शब्दव्यापारः अपेक्षते। सः व्यापारः व्यञ्जना।

॥ व्यङ्ग्यार्थः लक्षणायाः विषयः अपि न ॥

प्रतीयमानार्थः (व्यङ्ग्यार्थः) लक्ष्यार्थभिन्नः। यतः व्यङ्ग्यार्थस्य कार्यं लक्षणया भवितुं न शक्नोति।

(१) लक्ष्यार्थप्रतीतेः कृते मुख्यार्थबाधः आवश्यकः। किन्तु –

"श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धक शय्यायां मम निमङ्क्ष्यसि ॥"

इत्यत्र मुख्यार्थस्य अबाधे सति वाच्यार्थेन विधिरूपव्यङ्ग्यार्थः प्रतीयते। सः व्यङ्ग्यार्थः लक्षणायाः विषयः नास्ति। अतः व्यञ्जना लक्षणायाः भिन्ना।

(२) यथा अभिधा संकेतग्रहं विना न भवति तथैव लक्षणा मुख्यार्थबाधादिभिः हेतुभिः विना न सम्भवति। अतः लक्षणा 'अभिधापुच्छभूता' इत्याहुः। अतः लक्षणायाः व्यञ्जना भिन्ना।

(३) यद्यपि अभिधालक्षणयोः एकेन शब्देन अनेकेषाम् अर्थानां प्रतीतिः भवति तथापि ते सर्वे अर्थाः नियतसम्बन्धाः। किन्तु व्यञ्जनया ये विभिन्नाः अर्थाः प्रतीयन्ते ते सर्वे नियतसम्बन्धाः अनियतसम्बन्धाः परम्परितसम्बन्धाः च भवन्ति। यथा 'श्वश्रूरत्र०' इत्यादौ नियतसम्बन्धः। 'कस्य वा न भवति रोषो०' इत्यादौ अनियतसम्बन्धः।

(४) **"विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम्।**
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ॥"

भयकारणीभूतसिंहोपलब्धेः (हेतुः साधनं वा) (३) यद् यद् भीरुभ्रमणायोग्यं तत् तद् भयकारणाभाववद्, यथा – गृहम् (व्याप्तिः) (४) न चेदं तीरं तथा, भयकारणाभाववत् सिंहोपलब्धेः (उपनयः) (५) तस्मात् भीरुभ्रमणायोग्यम् (निगमनम्) एवं पञ्चावयववाक्येन 'भीरुभ्रमणायोग्यम्' इति व्यङ्ग्यार्थः अनुमाने पर्यस्यति ।

॥ महिमभट्टस्य अनुमानस्य खण्डनम् ॥

अत्र 'भयकारणसिंहोपलब्धेः' इति असद्धेतुः, अर्थात् हेत्वाभासः । अत्र पक्षसत्त्वं सपक्षसत्त्वं विपक्षासत्त्वं च नैव सिद्ध्यति । (१) भीरुरपि गुरोः प्रभोः वा निदेशेन प्रियानुरागेण अन्येन च भयकारणे सत्यपि भ्रमति । अतः 'भयकारणसिंहोपलब्धेः' इति हेतुना 'भीरुभ्रमणायोग्यत्वं' न सिद्ध्यति । तेन अनैकान्तिकः हेतुः (हेत्वाभासः)। (विपक्षासत्त्वं न) (२) शुनो बिभ्यदपि वीरत्वेन सिंहात् न बिभेतीति विरुद्धः हेतुः (हेत्वाभासः) । (३) गोदावरीतीरे सिंहसद्भावः प्रत्यक्षात् अनुमानात् वा न निश्चितः अपि तु वचनात् निश्चितः । न च वचनस्य प्रामाण्यमस्ति । अतः स्वरूपासिद्धः हेत्वाभासः । (पक्षसत्त्वं न) एवं 'भयकारणसिंहोपलब्धेः' इति असद्धेतुना साध्यसिद्धिः (भीरुभ्रमणायोग्यम्) कथं शक्यते ? अतः 'भीरुभ्रमणायोग्यम्' इति व्यङ्ग्यार्थः अनुमानस्य विषयः नास्त्येव । तथैव 'निःशेषच्युत०' इत्यादौ चन्दनच्यवनादीनि कारणान्तरतः अपि भवन्ति । अतः उपभोगे व्याप्तिः न भवति । तेन अनैकान्तिको हेतुः । अत्र 'अधम' इति पदेन यः व्यङ्ग्यार्थः व्यज्यते तद् अधमत्वं प्रत्यक्षेण अनुमानेन वा न सिद्ध्यति । यतः कुलटायाः उक्तिरियम् । अतः स्वरूपासिद्धः हेतुः । 'एवं विधादर्थादेवंविधोऽर्थ' इति सम्भावनामात्रेण व्यङ्ग्यस्य प्रतीतिः भवति । व्यञ्जनावादिनः तद् दूषणम् ।

॥ इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्य-
सङ्कीर्णभेदनिर्णयो नाम पञ्चम उल्लासः ॥

भेदप्रभेदानां कल्पनां कुर्वन्तः सन्ति । ते पारमार्थिकस्य स्वीकारं कुर्वन्ति तथैव व्यावहारिकस्यापि स्वीकारं कुर्वन्ति । अतः अखण्डवाक्येऽपि पद-पदार्थानां कल्पना कर्तव्या भविष्यति । (तैः अपि अविद्यापदपतितैः पदपदार्थकल्पना कर्तव्या इति) अतः एतस्यां स्थितौ 'निःशेषच्युतचन्दनम्०' इत्यादिषु उदाहरणेषु विध्यादिर्व्यङ्ग्य एव ।

॥ व्यङ्ग्यार्थ अनुमानस्य विषयः न ॥

नैयायिकमहिमभट्टस्य मतानुसारं व्यङ्ग्यार्थः अनुमानेन प्रतीयते । व्यक्तिविवेककारमहिमभट्टः व्यञ्जनायाः विरोधं कृत्वा प्रतिपादयति यत् अनुमानेन यः व्यङ्ग्यार्थः प्रतीयते सः वाच्यात् असम्बन्धः न भवति अन्यथा कुतश्चित् शब्दतः कस्यचित् अर्थस्य प्रतीतिः भविष्यति । *'ननु वाच्यादसम्बद्धं तावन्न प्रतीयते, यतः कुतश्चिद् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात् ।'*

अतः वाच्यव्यङ्ग्ययोः सम्बन्धः सिद्ध्यति । तेन व्यङ्ग्यव्यञ्जकभावसम्बन्धः निश्चीयते । सः नियतसम्बन्धः व्याप्तिः । तेन नियतसम्बन्धेन यः व्यङ्ग्यः प्रतीयते सा अनुमितिः । व्यङ्ग्यव्यञ्जकभावः वस्तुतः अनुमाप्यानुमापकभावः । तर्हि कथम् ? *'त्रिरूपात् लिङ्गात् लिङ्गज्ञानम् अनुमानम् ।'* त्रिरूपहेतुत्वात् साध्यज्ञानम् अनुमानम् । लिङ्गस्य त्रिरूपता इत्युक्तेः पक्षसत्त्वं सपक्षसत्त्वं विपक्षसत्त्वं च ।

- सन्दिग्धसाध्यवान् पक्षः । यथा पर्वते वह्निः ।
- निश्चितसाध्यवान् सपक्षः । यथा महानसे वह्निः ।
- निश्चितसाध्याभाववान् विपक्षः । यथा तडागे वह्निः ।

शुद्धहेतुः एतेषु त्रिषु पक्षसपक्षयोः भवेत् किन्तु विपक्षे तस्य अभावः भवेत् । तैः युक्तः हेतुः शुद्धहेतुः अन्यथा हेत्वाभासः । एवं त्रिरूपात् लिङ्गात् लिङ्गज्ञानम् अनुमानम् । लिङ्गम् - व्यञ्जकः । लिङ्गी - व्यङ्ग्यः । व्यङ्ग्यस्य प्रतीतिः अपि व्याप्तिं (सम्बन्धं) विना पक्षधर्मतां च विना नैव भवति । यथा-"भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन । गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥" महिमभट्टानुसारम् अत्र निषेधरूपव्यङ्ग्यार्थः अनुमानेन प्राप्यते । (१) गोदावरीतीरं भीरुभ्रमणायोग्यम् (प्रतिज्ञा साध्यं वा) (२)

रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः ॥"

शब्दचित्रं यथा –

प्रथममरुणच्छायस्तावत्ततः कनकप्रभः
तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

एतस्मिन् उदाहरणे अनुप्रासालङ्कारस्य प्रधानतया शब्दचित्रम् ॥

अर्थचित्रं यथा –

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥

एतस्मिन् उदाहरणे उपमा–श्लेषादीनाम् अलङ्काराणां प्रधानतया अर्थचित्रम् ।

यद्यपि काव्ये सर्वत्र विभावादिरूपतया पर्यवसानं भवति अतः सर्वत्र व्यङ्ग्यसम्बन्धेन ध्वनिकाव्यं तथा च गुणीभूतव्यङ्ग्यकाव्यम् इति भेदद्वयं भवेत् । तथापि स्फुटस्य रसस्य अनुपलम्भात् अव्यङ्ग्यमेतत् काव्यद्वयम् उक्तम् । अत्र च शब्दार्थालङ्कारभेदाद् बहवः भेदाः भवितुं शक्नुवन्ति । अलङ्कारनिर्णये तेषां विवेचनं कृतम् ॥

॥ इति काव्यप्रकाशे शब्दार्थचित्रनिरूपणं नाम षष्ठोल्लासः ॥

०००

॥ अथ षष्ठोल्लासः ॥

प्रथमे उल्लासे काव्यस्य प्रकाराः उक्ताः । १. ध्वनिकाव्यम् २. गुणीभूतव्यङ्ग्यकाव्यम् ३. चित्रकाव्यम् । व्यङ्ग्यप्रधानध्वनिकाव्यस्य चतुर्थे उल्लासे तथा च गुणीभूतव्यङ्ग्यकाव्यस्य पञ्चमे उल्लासे भेदोपभेदसहितं विस्तारपूर्वकं वर्णनं कृतम् । इदानीं व्यङ्ग्यार्थरहितस्य चित्रकाव्यस्य निरूपणं षष्ठे उल्लासे मम्मटाचार्यः करोति । वस्तुतः प्रथमोल्लासे चित्रकाव्यस्य वर्णनं कृतम् अत्र तस्य आवश्यकता नासीत् । तथापि ध्वनिगुणीभूतव्यङ्ग्ययोः विवेचनं भिन्नभिन्नोल्लासेषु कृतम् अतः चित्रकाव्यस्य विवेचनम् अपि भिन्नोल्लासे भवेत् इति मत्वा ग्रन्थकारः षष्ठोल्लासस्य प्रारम्भं करोति ।

चित्रकाव्यस्य प्रकारद्वयम् उक्तम् – (१) शब्दचित्रम् (२) अर्थचित्रम् चेति । तस्य अर्थः एवं नास्ति यत् शब्दचित्रे अर्थचित्रस्य उपयोगः नास्ति तथा च अर्थचित्रे शब्दचित्रस्य प्रयोगः नास्ति । यथा 'स्वच्छन्दोच्छलदच्छ०' इत्यादौ शब्दचित्रेऽपि व्यतिरेकालङ्कारः अस्ति । तथा च 'विनिर्गतं मानदमात्ममन्दिरात्०' इत्यादौ अर्थचित्रेऽपि मकारस्यावृत्तिवशात् वृत्त्यनुप्रासालङ्कारः । किन्तु 'प्राधान्येन व्यपदेशाः भवन्ति' इति न्यायेन शब्दचित्रम् अर्थचित्र वा इति व्यवहारः इष्यते ।

शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम् ।
गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ॥

शब्दचित्रे न तु अर्थस्य अचित्रत्वम् अर्थचित्रे वा शब्दस्य । ग्रन्थकारः भामहाचार्यस्य कारिकात्रयम् उद्धृतं करोति । भामहाचार्यः प्रतिपादयति यत् केचन अर्थालङ्काराणां प्राधान्यं स्वीकुर्वन्ति केचन तु शब्दालङ्काराणाम् । रूपकादीनाम् अलङ्काराणां प्रतीतिः अर्थप्रतीत्यनन्तरं भवति । अतः 'रूपकादिमलङ्कारं बाह्यमाचक्षते' इत्याहुः । शब्दालङ्काराणां प्रतीतिः काव्यानुशीलनसमये एव भवति अतः शब्दालङ्काराः अन्तरङ्गाः । किन्तु भामहानुसारं भेदद्वयमपि इष्टम् ।

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥

ISBN - 13 - 078-81-925721-3-0

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info